रङ्ग-मङ्गल-दीपिकायै नमः। ध्वज-वज्राङ्कुशाब्ज-मालति-मृदु-पादतल-लाञ्छितायै नमः। तारका-कार-नखरायै नमः। प्रवाल-मृदु-लाङ्गुल्यै नमः। कूर्मो-पमेय-पादोर्ध्व-भागायै नमः। शोभन-पार्ष्णि-कायै नमः। वेदार्थ-भाव-तत्त्वज्ञायै नमः (६०) लोका-राध्याङ्घ्रि-पङ्कजायै नमः। आनन्द-बुद्-बुदाकार-सुगुल्फायै नमः। परमांश-कायै नमः। अतुल-प्रतिमा-भास्वदङ्गुलीयक-भूषितायै नमः। मीन-केतन-तूणीर-चारुजङ्घा-विराजितायै नमः। कुब्ज-जानुद्वया-ढ्यायै नमः। स्वर-रम्भाभ-शक्ति-कायै नमः। विशाल-जघनायै नमः। पीतसु-श्रोण्यै नमः। मणि-मेखलायै नमः। आनन्द-सागरावर्त-गम्भीराम्भोज-नाभिकायै नमः। भास्वद्-बलि-त्रिकायै नमः। चारु-पूर्ण-लावण्य-संयुतायै नमः। नव-रोमावलि-राज्यै नमः। सुधा-कुम्भ-स्तन्यै नमः। कल्प-माला-निभ-भुजायै नमः। चन्द्र-खण्डन-खाञ्चितायै नमः। प्रवा-लाङ्गुलि-विन्यस्त-महा-रत्नाङ्गुलीय-कायै नमः। नवारुण-प्रवालाभ-पाणि-देश-समञ्चितायै नमः। कम्बु-कण्ठ्यै नमः (८०) सुचिबुकायै नमः। बिम्बोष्ठ्यै नमः। कुन्द-दन्तयुजे नमः। कारुण्य-रस-निष्यन्द-लोचन-द्वय-शालिन्यै नमः। कमनीय-प्रभा-भास्वच्-चाम्पेय-निभ-नासिकायै नमः। दर्पणाकार-विपुल-कपोल-द्वित-याञ्चितायै नमः। अनन्तार्क-प्रकाशोद्यन्-मणि-ताटङ्क-शोभितायै नमः। कोटि-सूर्याग्नि-सङ्काश-नाना-भूषण-भूषितायै नमः। सुगन्ध-वदनायै नमः। सुभ्रवे नमः। अर्ध-चन्द्र-ललाटि-कायै नमः। पूर्णचन्द्रा-ननायै नमः। नीलकुटि-लालक-शोभितायै नमः। सौन्दर्य-सीमा-विलसत्-कस्तूरी-तिलकोज्ज्वलायै नमः। धगद्धगाय-मानोद्यन्-मणि-

भूषण-राजितायै नमः। जाज्ज्वल्य-मान-सद्रत्न-दिव्य-चूडावतंस-कायै नमः। सूर्य-चन्द्रादि-कल्याण-भूषणाञ्चित-वेणिकायै नमः। अत्यर्कानल-तेजोवन्-मणि-कञ्चुक-धारिण्यै नमः। सद्रत्न-जाल-विद्योत-विद्युत्-पुञ्जाभ-शाटिकायै नमः। नाना-मणि-गणाकीर्ण-काञ्चनाङ्गद-भूषितायै नमः। कुङ्कुमागुरु-कस्तूरि-दिव्य-चन्दन-चर्चितायै नमः। स्वोचितो-ज्ज्वल-विद्योत-विचित्र-मणि-हारिण्यै नमः। परिभास्वद्-रत्न-पुञ्ज-दीप्त-स्वर्ण-निचोलि-कायै नमः। असङ्ख्येय-सुख-स्पर्श-सर्वावयव-भूषणायै नमः। मल्लिका-पारिजातादि-दिव्य-पुष्प-श्रियाञ्चितायै नमः। श्रीरङ्ग-निलयायै नमः। पूज्यायै नमः। दिव्य-देवी-सेवितायै नमः (१०८) स्वस्तिश्रीः।।

।। अथ श्रीरामानुजाष्टोत्तर-शतनामावलिः ।।

रामानुजाय नमः। पुष्कराक्षाय नमः। यतीन्द्राय नमः। करुणा-कराय नमः। कान्ति-मत्यात्म-जाय नमः। श्रीमते नमः। लीला-मानुष-विग्रहाय नमः। सर्व-शास्त्रार्थ-तत्त्वज्ञाय नमः। सर्वज्ञाय नमः। सज्जन-प्रियाय नमः। नारायण-कृपा-पात्राय नमः। श्रीभूतिपुर-नायकाय नमः। अनघाय नमः। भक्त-मन्दाराय नमः। केशवानन्द-वर्धनाय नमः। काञ्ची-पूर्ण-प्रिय-सखाय नमः। प्रणतार्ति-विनाशकाय नमः। पुण्य-सङ्कीर्तनाय नमः। पुण्याय नमः। ब्रह्म-राक्षस-मोचकाय नमः (२०) यादव-पादि-तापार्थ-वृक्ष-छेद-कुठारकाय नमः। अमोघाय नमः। लक्ष्मण-मुनये नमः। शारदा-शोक-नाशनाय नमः। निरन्तर-जनाज्ञान-विमोचन-विचक्षणाय नमः। वेदान्त-द्वय-सार-ज्ञाय नमः। वरदाम्बु-प्रदायकाय नमः। पराभि-प्राय-तत्त्वज्ञाय नमः।

यामुनाङ्गुलि-मोचकाय नमः। देवराज-कृपा-लब्ध-षड्-वाक्यार्थ-महोदधये नमः। पूर्णार्य-लब्ध-सन्मन्त्राय नमः। शौरि-पादाब्ज-षट्-पदाय नमः। त्रिदण्ड-धारिणे नमः। ब्रह्मज्ञाय नमः। ब्रह्मज्ञान-परायणाय नमः। रङ्गेश-कैङ्कर्य-रताय नमः। विभूति-द्वय-नायकाय नमः। गोष्ठि-पूर्ण-कृपा-लब्ध-मन्त्रराज-प्रकाशकाय नमः। वररङ्गानु-कम्पात्त-द्राविडाम्नाय-पारगाय नमः। माला-धरार्य-सुज्ञात-द्राविडाम्नाय-तत्त्वधिये नमः (४०) चतुःसप्त-शिष्या-ढ्याय नमः। पञ्चाचार्य-पदाश्रयाय नमः। प्रपीत-विष-तीर्थाम्बु-प्रकटी-कृत-वैभवाय नमः। प्रणतार्ति-हराचार्य-दत्त-भिक्षैक-भोजनाय नमः। पवित्री-कृत-कूरेशाय नमः। भागिनेय-त्रिदण्डकाय नमः। कूरेश-दाशरथ्यादि-चरमार्थ-प्रकाशकाय नमः। रङ्गेश-वेङ्कटेशादि-प्रकटी-कृत-वैभवाय नमः। देवराजार्चन-रताय नमः। मूक-मुक्ति-प्रदायकाय नमः। यज्ञमूर्ति-प्रतिष्ठात्रे नमः। मन्नाथाय नमः। धरणी-धराय नमः। वरदाचार्य-सद्भक्ताय नमः। यज्ञेशार्ति-विनाशकाय नमः। अनन्ताभीष्ट-फलदाय नमः। विट्ठलेश-प्रपूजिताय नमः। श्रीशैल-पूर्ण-करुणा-लब्ध-रामायणार्थ-काय नमः। प्रपत्ति-धर्मैक-रताय नमः। गोविन्दार्य-प्रियानुजाय नमः (६०) व्यास-सूत्रार्थ-तत्त्वज्ञाय नमः। बोधायन-मतानुगाय नमः। श्रीभाष्यादि-महाग्रन्थ-कारकाय नमः। कलि-नाशनाय नमः। अद्वैत-मत-विच्छेत्रे नमः। विशिष्टाद्वैत-पारगाय नमः। कुरङ्ग-नगरी-पूर्णमन्त्र-रत्नोप-देशिकाय नमः। विनाशितेतर-मताय नमः। शेषीकृत-रमापतये नमः। पुत्रीकृत-शठारातये नमः। शठजिते नमः। ऋण-मोचकाय नमः। भाषादत्त-हयग्रीवाय नमः। भाष्यकाराय

नमः। महायशसे नमः। पवित्रीकृत-भूभागाय नमः। कूर्मनाथ-प्रकाशकाय नमः। श्रीवेङ्कटाचलाधीश-शङ्खचक्र-प्रदायकाय नमः। श्रीवेङ्कटेश-श्वशुराय नमः। श्रीरामसख-देशिकाय नमः (८०) कृपामात्र-प्रसन्नार्याय नमः। गोपिका-मोक्ष-दायकाय नमः। समीचीनार्य-सच्छिष्य-सत्कृताय नमः। वैष्णव-प्रियाय नमः। कृमि-काण्ट-नृप-ध्वंसिने नमः। सर्व-मन्त्र-महोदधये नमः। अङ्गी-कृतान्ध्र-पूर्णार्याय नमः। शालग्राम-प्रतिष्ठिताय नमः। श्रीभक्त-ग्राम-पूर्णेशाय नमः। विष्णु-वर्धन-रक्षकाय नमः। बौद्ध-ध्वान्त-सहस्रांशवे नमः। शेष-रूप-प्रदर्शकाय नमः। नगरी-कृत-वेदाद्रये नमः। दिल्लीश्वर-समर्चिताय नमः। नारायण-प्रतिष्ठात्रे नमः। सम्पत्पुत्र-विमोचकाय नमः। सम्पत्कुमार-जनकाय नमः। साधु-लोक-शिखा-मणये नमः। सुप्रतिष्ठित-गोविन्द-राजाय नमः। पूर्ण-मनोरथाय नमः। गोदाग्र-जाय नमः। दिग्विजेत्रे नमः। गोदाभीष्ट-प्रपूरकाय नमः। सर्वसंशय-विच्छेत्रे नमः। विष्णु-लोक-प्रदायकाय नमः। अव्याहत-महद्-वर्त्मने नमः। यति-राजाय नमः। जगद्गुरवे नमः (१०८) स्वस्तिश्रीः।।

।। अथ श्रीलक्ष्मी-द्वादश-नामावलिः ।।

१. ॐ श्रियै नमः, २. ॐ अमृतोद्भवायै नमः, ३. ॐ कमलायै नमः, ४. ॐ चन्द्र-सोदर्यै नमः, ५. ॐ विष्णु-पत्न्यै नमः, ६. ॐ वैष्णव्यै नमः, ७. ॐ वरा-रोहायै नमः, ८. ॐ हरि-वल्लभायै नमः, ९. ॐ शार्ङ्गिण्यै नमः १०. ॐ देव-देविकायै नमः, ११. ॐ लोक-सुन्दर्यै नमः, १२. ॐ महालक्ष्म्यै नमः ।।

।। प्रार्थना ।।

नमः श्रियै लोक-धात्र्यै ब्रह्म-मात्रे नमो नमः ।
नमस्ते पद्म-नेत्रायै पद्म-मुख्यै नमो नमः ।।
नमो बिल्व-वन-स्थायै विष्णु-पत्न्यै नमो नमः ।
विचित्र-क्षौम-धारिण्यै पृथु-श्रोण्यै नमो नमः ।
पक्व-बिल्व-फलापीन-तुङ्ग-स्तन्यै नमो नमः ।।
सरक्त-पद्म-पत्राक्ष-कर-पाद-तले शुभे ।
संरक्ताङ्गद-केयूर-काञ्ची-नूपुर-शोभिते ।।
यक्ष-कर्दम-संलिप्ते सर्वाङ्गे कनकोज्ज्वले ।
माङ्गल्या-भरणै-श्चित्रैः मुक्ता-हारै-र्विभूषिते ।।
ताटङ्कै-रवतंसैश्च शोभ-मान-मुखाम्बुजे ।
पद्म-हस्ते नमस्तुभ्यं प्रसीद हरि-वल्लभे ।।
ऋग्-यजुः-साम-रूपायै विद्यायै ते नमो नमः ।
प्रसीदास्मान् कृपा-दृष्टि-पातै-रालोकयाब्धिजे ।।
नृत्य-वाद्यादि-गीतादि-पुराण-पठनादिभिः ।
राजोपचारैः सकलैः सन्तुष्टो भव राघव ।।
सन्तुष्टो भव राघव । सन्तुष्टो भव राघव ।।

।। अथ मङ्गलार्तिक्यम् ।।

लक्ष्मी-चरण-लाक्षाङ्क-साक्षि श्रीवत्स-वक्षसे ।
क्षेम-कराय सर्वेषां श्रीरङ्गेशाय मङ्गलम् ।।
श्रियःकान्ताय देवाय कल्याण-निधयेऽर्थिनाम् ।
श्रीवेङ्कट-निवासाय श्रीनिवासाय मङ्गलम् ।।१।।

लक्ष्मीश-विभ्रमा-लोल- सुभ्रू-विभ्रम-चक्षुषे ।
चक्षुषे सर्व-लोकानां वेङ्कटेशाय मङ्गलम् ।।२।।
श्रीवैकुण्ठ-विरक्ताय स्वामि-पुष्करिणी-तटे ।
रमया रम-माणाय वेङ्कटेशाय मङ्गलम् ।।३।।
कमला-कुच-कस्तूरी- कर्दमाङ्कित-वक्षसे ।
यादवाद्रि-निवासाय सम्पत्-पुत्राय मङ्गलम् ।।४।।
सुस्मिताय सुनासाय सुन्दरे सुदृशे भ्रुवे ।
सुललाट-किरीटाय रङ्ग-राजाय मङ्गलम् ।।५।।
अस्तु श्रीस्तन-कस्तूरी- वासना-वासि-तोरसे ।
श्रीहस्ति-गिरि-नाथाय देवराजाय मङ्गलम् ।।६।।
मङ्गलं कोसलेन्द्राय महनीय-गुणात्मने ।
चक्रवर्ति-तनूजाय सार्व-भौमाय मङ्गलम् ।।७।।
श्रीमद्-गोपाल-बालाय गोदाभीष्ट-प्रदायिने ।
श्रीसत्या-सहिता-यास्तु कृष्ण-देवाय मङ्गलम् ।८।
नीलाचल-निवासाय नित्याय परमात्मने ।
सुभद्रा-प्राण-नाथाय जगन्नाथाय मङ्गलम् ।।९।।
सुभद्रा-प्राण-नाथाय सुभद्रा-ह्वान-शालिने ।
बलभद्र-सनाथाय जगन्नाथाय मङ्गलम् ।।१०।।
कूरेश-कूरुका-नाथ-दाशरथ्यादि-देशिकैः ।
तच्छिष्या-भ्यर्थिने तस्मै यतिराजाय मङ्गलम् ।११।
शेषो वा सैन्य-नाथो वा श्रीपतिर्-वेति सात्त्विकैः
वितर्क्याय महाप्राज्ञैः भाष्यकाराय मङ्गलम् ।१२।

तुलामूलाय तीर्णाय तोषिता-खिल-सूरये ।
सौम्य-जामातृ-मुनये शेषांशा-यास्तु मङ्गलम् ।१३
मङ्गला-शासन-परैः मदाचार्य-पुरोगमैः ।
सर्वैश्च पूर्वै-राचार्यैः सत्कृता-यास्तु मङ्गलम् ।१४।

।। अथ गुरुपरम्परा ।।

सर्व-देश-दिशा-कालेष्व-व्याहत-पराक्रमा ।
रामानुजार्य-दिव्याज्ञा वर्धता-मभि-वर्धताम् ।।१।।
रामानुजार्य-दिव्याज्ञा प्रति-वासर-मुज्ज्वला ।
दिगन्त-व्यापिनी भूयात् सा हि लोक-हितैषिणी ।।२।।
श्रीमान् श्रीरङ्ग-श्रियम् अनुप-द्रवा-मनुदिनं संवर्धय ।
नमो रामानुजार्याय वेदान्तार्थ-प्रदायिने ।।३।।
नमः श्रीशैल-नाथाय कुन्ती-नगर-जन्मने ।
प्रसाद-लब्ध-परम-प्राप्य-कैङ्कर्य-शालिने ।।४।।
श्रीशैलेश-दया-पात्रं धी-भक्त्यादि-गुणार्णवम् ।
यतीन्द्रं प्रवणं वन्दे रम्यजा-मातरं मुनिम् ।।५।।
लक्ष्मी-नाथ-समारम्भां नाथ-यामुन-मध्यमाम् ।
अस्मदाचार्य-पर्यन्तां वन्दे गुरुपरम्पराम् ।।६।।

यो नित्य-मच्युत-पदाम्बुज-युग्म-रुक्म-
व्यामोहतस्-तदित-राणि तृणाय मेने ।
अस्मद्गुरोर्-भगवतोऽस्य दयैक-सिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये ।।७।।

माता पिता युवतय-स्तनया विभूतिः

सर्वं यदेव नियमेन मदन्वयानाम् ।
आद्यस्य नः कुलपतेर्-वकुला-भिरामं
श्रीमत्-तदङ्घ्रि-युगलं प्रणमामि मूर्ध्ना ।।८।।

भूतं सरश्च महदाह्वय-भट्टनाथ-
श्रीभक्ति-सार-कुल-शेखर-योगि-वाहान् ।
भक्ताङ्घ्रि-रेणु-पर-काल-यतीन्द्र-मिश्रान्
श्रीमत्-पराङ्कुश-मुनिं प्रणतोऽस्मि नित्यम् ।९।

गुरु-मुख-मनधीत्य प्राह वेदान् अशेषान् ।
नरपति-परिक्लृप्तं शुल्क-मादा-तुकामाः ।
श्वसुर-ममर-वन्द्यं रङ्ग-नाथस्य साक्षाद्
द्विज-कुल-तिलकं तं विष्णु-चित्तं नमामि ।१०।

अस्मद्-देशिक-मस्मदीय-परमा-चार्यान् अशेषान् गुरून्
श्रीमल्लक्ष्मण-योगि-पुङ्गव-महापूर्णं मुनीनां मुनिम् ।
रामं पद्म-विलोचनं मुनिवरं नाथं शठ-द्वेषिणं
सेनेशं श्रिय-मिन्दिरा-सहचरं नारायणं संश्रये ।।११।।

वेदान्त- देशिक- कटाक्ष- विवृद्ध- बोधं
कान्तोप-यन्तृ-यमिनः करुणैक-पात्रम् ।
वत्सान्व - याय - मनवद्य - गुणै - रुपेतं
भक्त्या भजामि परवादि-भयङ्करार्यम् ।१२।

(जगदाचार्य श्रीत्रिदण्डी स्वामी श्रीविष्वक्सेनाचार्यजी महाराज)

काषायं यज्ञ-सूत्रं शुचि वपुषि तथा चोर्ध्व-पुण्ड्रं च भाले
यस्यास्ते दक्षहस्ते कलि-कुमति-गिरीन्द्रेन्द्र-वज्रं त्रिदण्डम् ।

संसाराग्नि-प्रशान्त्यै भृत-जल-ममलं दारु-पात्रं पवित्रं
श्रीविष्वक्-सेन-सूरेः पद-कमल-युगं श्रेयसे संश्रयामि ।१३।

(जगद्गुरु रामानुजाचार्य वेदान्त-मार्तण्ड
यतीन्द्र स्वामी श्रीरामनारायणाचार्यजी महाराज)

काषायाम्बर-दण्ड-मण्डित-करं लक्ष्मीश-पूजारतं
वेदान्त-द्वय-पारगं श्रित-निधिं वादीभ-सिंह्यायितम् ।
विष्वक्-सेन-यतीन्द्र-देशिक-कृपा-लब्धैक-सञ्जीवनं
वन्दे वन्द्य-जगद्गुरुं यतिवरं श्रीराम-नारायणम् ।।१४।।

(जगद्गुरु रामानुजाचार्य स्वामी श्रीवासुदेवाचार्य जी महाराज)

शाण्डिल्या-ह्वय-वंश-वारिधि-विधुं श्रीकोसलेशार्चकं
विष्वक्-सेन-यतीन्द्र-देशिक-पद-द्वन्द्वार-विन्दाश्रितम् ।
स्वाचार्ये सुयतौ जगद्गुरु-वरे श्रीरामनारायणे
नित्यं सक्त-मतिं जगद्गुरु-वरं श्रीवासुदेवं भजे ।।१५।।

(स्वामी श्रीजयरामदास 'महन्त' जी महाराज)

श्रीमत्-कश्यप-वंश-वारिधि-विधुं श्रीराम-वर्णाङ्घ्रिपं
सीता-राघव-पाद-पद्म-युगले संसक्त-चित्तं मुनिम् ।
श्री-साकेत-निवास-दिव्य-रसिकं गो-साधु-सेवा-रतं
वन्दे श्रीजय-रामदास-यमिनं भक्त्या-न्वहं सादरम् ।।१६।।

(जगद्गुरु रामानुजाचार्य स्वामी श्रीराघवाचार्यजी महाराज)

श्रीमत्-कश्यप-गोत्र-लब्ध-जनुषं विद्या-विभूषोन्नतं
सच्छास्त्रार्णव-पारगामि-विदुषां मान्यं मनोज्ञ-श्रियम् ।
स्वाचार्ये च जगद्गुरौ बुध-वरे श्रीवासुदेवे रतं

वन्दे वन्द्यजगद्गुरुं मुनिवरं श्रीराघवार्यं गुरुम् ।।१७।।

श्रीमते रम्य-जामातृ-मुनीन्द्राय महात्मने ।

श्रीरङ्ग-वासिनं भूयाद् नित्य-श्रीर्-नित्य-मङ्गलम् ।१८।

मङ्गलं यतिराजाय श्रीभाष्यामृत-दायिने ।

सौलभ्य-परिपूर्णाय महापूर्णाय मङ्गलम् ।।१९।।

मङ्गलं गुरुवर्याय मङ्गलं गुणसिन्धवे ।

वादि-भीति-करार्याय नित्य-श्रीर्-नित्य-मङ्गलम् ।।

जयति यतिराज! फणिराजावतार-मणे!

प्रबल- पाखण्ड- तमो- हरण- भानो !

विजयी भव । विजयी भव । विजयी भव ।।

अमर्यादः क्षुद्रश्-चल-मति-रसूय-प्रसवभूः

कृतघ्नो दुर्मानी स्मर-पर-वशो वञ्चन-परः ।

नृशंसः पापिष्ठः कथ-मह-मितो दुःख-जलधेः

अपारा-दुत्तीर्णस्-तव परि-चरेयं चरणयोः ।।

अपराध-सहस्र-भाजनं पतितं भीम-भवार्ण-वोदरे ।

अगतिं शरणा-गतं हरे कृपया केवल-मात्म-सात्कुरु ।।

।। अथ श्रीवेङ्कटेश-सुप्रभातम् ।।

कौसल्या सुप्रजा राम पूर्वा सन्ध्या प्रवर्तते । **उत्तिष्ठ नर-शार्दूल** कर्तव्यं दैव-माह्निकम् ।।१।। **उत्तिष्ठो-त्तिष्ठ गोविन्द** उत्तिष्ठ गरुडध्वज। **उत्तिष्ठ कमला-कान्त** त्रैलोक्यं मङ्गलं कुरु ।।२।। **मातः समस्त-जगतां मधुकैटभारेः** वक्षो-विहारिणि मनोहर-दिव्य-मूर्ते। **श्रीस्वामिनि श्रितजन-प्रियदान-शीले** श्रीवेङ्कटेश-दयिते तव सुप्रभातम् ।।३।।

तव सुप्रभात-मरविन्द-लोचने भवतु प्रसन्न-मुखचन्द्र-मण्डले। **विधि-शङ्करेन्द्र-वनिताभि-रर्चिते** वृष-शैलनाथ-दयिते दयानिधे ।।४।। **अत्र्यादि-सप्त ऋषयः समुपास्य सन्ध्याम्** आकाश-सिन्धु-कमलानि मनोहराणि । **आदाय पादयुग-मर्चयितुं प्रपन्नाः** शेषाद्रि-शेखर-विभो तव सुप्रभातम् ।।५।। **पञ्चाननाब्ज-भव-षण्मुख-वासवाद्याः** त्रैविक्रमादि-चरितं विबुधाः स्तुवन्ति । **भाषापतिः पठति वासर-शुद्धि-मारात्** शेषाद्रि-शेखर-विभो तव सुप्रभातम् ।।६।। **ईषत्-प्रफुल्ल-सरसीरुह-नारिकेल-**पूग-द्रुमादि-सुमनोहर-पालिकानाम् । **आवाति मन्द-मनिलः सह दिव्य-गन्धैः** शेषाद्रि-शेखर-विभो तव सुप्रभातम् ।।७।। **उन्मील्य नेत्र-युग-मुत्तम-पञ्जरस्थाः** पात्रा-वशिष्ट-कदली-फल-पायसानि । **भुक्त्वा सलील-मथ केलि-शुकाः पठन्ति** शेषाद्रि-शेखर-विभो तव सुप्रभातम् ।।८।। **तन्त्री-प्रकर्ष-मधुर-स्वनया विपञ्च्या** गायत्यनन्त-चरितं तव नारदोऽपि । **भाषा-समग्र-मसकृत्-करचार-रम्यं** शेषाद्रि-शेखर-विभो तव सुप्रभातम् ।।९।। **भृङ्गावली च मकरन्द-रसानुविद्ध-**झङ्कार-गीत-निनदैः सह सेवनाय। **निर्यात्युपान्त-सरसी-कमलो-दरेभ्यः** शेषाद्रि-शेखर-विभो तव सुप्रभातम् ।।१०।। **योषा-गणेन वर-दध्नि-विमथ्य-माने** घोषा-लयेषु दधि-मन्थन-तीव्र-घोषाः । **रोषात् कलिं विदधते ककुभश्च कुम्भाः** शेषाद्रि-शेखर-विभो तव सुप्रभातम् ।।११।। **पद्मेश-मित्र-शत-पत्र-गतालि-वर्गाः** हर्तुं श्रियं कुवल-यस्य निजाङ्ग-लक्ष्म्या। **भेरी-निनाद-मिव बिभ्रति तीव्र-नादं** शेषाद्रि-शेखर-विभो तव सुप्रभातम् ।।१२।। **श्रीमन्नभीष्ट-वरदाखिल-लोक-बन्धो** श्रीश्री-निवास

जगदेक-दयैक-सिन्धो । **श्रीदेवता-गृह-भुजान्तर दिव्य-मूर्ते** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।१३।। **श्रीस्वामि-पुष्करिणि-काऽऽप्लव-निर्मलाङ्गाः** श्रेयोऽर्थिनो हर-विरिञ्च-सनन्दनाद्याः। **द्वारे वसन्ति वर-वेत्र-हतोत्त-माङ्गाः** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।१४।। **श्रीशेष-शैल-गरुडाचल-वेङ्कटाद्रि-**नारायणाद्रि-वृषभाद्रि-वृषाद्रि-मुख्याम् । **आख्यां त्वदीय-वसते-रनिशं वदन्ति** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।१५।। **सेवापराः शिव-सुरेश-कृशानुधर्म-**रक्षोऽम्बु-नाथ-पवमान-धनाधि-नाथाः । **बद्धाञ्जलि-प्रविल-सन्निज-शीर्ष-देशाः** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।१६।। **घाटीषु ते विहग-राज-मृगाधि-राज-**नागाधि-राज-गजराज-हयाधि-राजाः । **स्व-स्वाधिकार-महिमाधिक-मर्थयन्ते** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।१७।। **सूर्येन्दु-भौम-बुध-वाक्पति-काव्य-सौरि-**स्वर्भानु-केतु-दिविषत्-परिषत्-प्रधानाः । **त्वद्-दासदास-चरमावधि-दास-दासाः** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।१८।। **त्वत्-पाद-धूलि-भरित-स्फुरितो-त्तमाङ्गाः** स्वर्गाप-वर्ग-निरपेक्ष-निजान्त-रङ्गाः । **कल्पा-गमाऽऽकल-नयाऽऽकुलतां लभन्ते** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।१९।। **त्वद्-गोपुराग्र-शिखराणि निरीक्ष-माणाः** स्वर्गाप-वर्ग-पदवीं परमां श्रयन्तः । **मर्त्या मनुष्य-भुवने मति-माश्रयन्ते** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।२०।। **श्रीभूमि-नायक दयादि-गुणा-मृताब्धे** देवाधि-देव जगदेक-शरण्य-मूर्ते । **श्रीमन् अनन्त गरुडादिभि-रर्चिताङ्घ्रे** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।२१।। **श्रीपद्मनाभ पुरुषोत्तम वासुदेव** वैकुण्ठ माधव जनार्दन चक्रपाणे ।

श्रीवत्स-चिह्न शरणागत-पारिजात श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।२२।। **कन्दर्प-दर्प-हर-सुन्दर दिव्य-मूर्ते** कान्ता-कुचाम्बु-रुह कुट्-मल-लोल-दृष्टे । **कल्याण-निर्मल-गुणाकर दिव्य-कीर्ते** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।२३।। **मीनाकृते कमठ-कोल नृसिंह-वर्णिन्** स्वामिन् परश्वथ-तपोधन रामचन्द्र । **शेषांश राम यदुनन्दन कल्कि-रूप** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।२४।। **एलाल-वङ्ग-घन-सार-सुगन्धि-तीर्थं** दिव्यं वियत्-सरिति हेम-घटेषु पूर्णम् । **धृत्वाऽद्य वैदिक-शिखा-मणयः प्रहृष्टाः** तिष्ठन्ति वेङ्कट-पते तव सुप्रभातम् ।।२५।। **भास्वा-नुदेति विकचानि सरोरु-हाणि** सम्पूरयन्ति निनदैः ककुभो विहङ्गाः। **श्रीवैष्णवाः सतत-मर्थित-मङ्गलास्ते** धामा-श्रयन्ति तव वेङ्कट सुप्रभातम् ।।२६।। **ब्रह्मादयः सुरवराः समहर्ष-यस्ते** सन्तः सनन्दन-मुखास्त्वथ योगिवर्याः । **धामान्तिके तव हि मङ्गल-वस्तु-हस्ताः** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।२७।। **लक्ष्मी-निवास निरवद्य-गुणैक-सिन्धो** संसार-सागर-समुत्तरणैक-सेतो । **वेदान्त-वेद्य निज-वैभव भक्त-भोग्य** श्री-वेङ्कटाचल-पते तव सुप्रभातम् ।।२८।। **इत्थं वृषा-चल-पते-रिह सुप्रभातं** ये मानवाः प्रति-दिनं पठितुं प्रवृत्ताः । **तेषां प्रभात-समये स्मृति-रङ्ग-भाजां** प्रज्ञां परार्थ-सुलभां परमां प्रसूते ।।२९।। **इति।।**

।। अथ श्रीवरद-वल्लभा-स्तोत्रम् ।।

(श्रीमद्-यामुन-मुनि-विरचिता चतुःश्लोकी)

यत्-पदाम्भो-रुह-ध्यान-विध्वस्ता-शेष-कल्मषः । **वस्तुता-मुप-यातोऽहं** यामुनेयं नमामि तम् ।। **कान्तस्ते पुरुषोत्तमः फणिपतिः**

शय्यासनं वाहनं वेदात्मा विहगेश्वरो जवनिका माया जगन्मोहिनी । **ब्रह्मेशादि-सुर-व्रजः सदयितस्त्वद्-दास-दासी-गणः** श्रीरित्येव च नाम ते भगवति ब्रूमः कथं त्वां वयम् ।।१।। **यस्यास्ते महिमान-मात्मन इव त्वद्-वल्लभोऽपि प्रभुः** नालं मातु-मियत्-तया निरवधिं नित्यानु-कूलं स्वतः । **तां त्वां दास इति प्रपन्न इति च स्तोष्याम्यहं निर्भयो** लोकै-केश्वरि लोकनाथ-दयिते दान्ते दयान्ते विदन् ।।२।। **ईषत्-त्वत्-करुणा-निरीक्षण-सुधा-सिन्धु-क्षणा-द्रक्ष्यते** नष्टं प्राक्तद-लाभत-स्त्रिभुवनं सम्प्रत्यनन्तो-दयम् । **श्रेयो नह्यरविन्द-लोचन-मनः कान्ता-प्रसादा-दृते** संसृत्याक्षर-वैष्णवा-ध्वसु नृणां सम्भाव्यते कर्हिचित् ।।३।। **शान्तानन्त-महाविभूति-परमं यद् ब्रह्म-रूपं हरेः** मूर्ते ब्रह्म ततोऽपि यत् प्रियतरं रूपं यदत्यद्भुतम् । **यान्यन्यानि यथासुखं विहरतो रूपाणि सर्वाणि ता-न्याहुः** स्वै-रनुरूप-रूप-विभवै-र्गाढोप-गूढानि ते ।।४।। **अकार-त्रय-सम्पन्नाम्** अरविन्द-निवासिनीम् । **अशेष-जगदीशित्रीं** वन्दे वरद-वल्लभाम् ।।५।। **ओं तत्सत् ।।**

।। अथ श्रीमद् आलवन्दार-स्तोत्रम् ।।

(श्रीमद्यामुनाचार्यानुगृहीतं स्तोत्ररत्नम्)

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् । **स्तोत्र-यामास योगीन्द्रस्तं** वन्दे यामुनाह्वयम् ।। **नमो नमो यामुनाय** यामुनाय नमो नमः । **नमो नमो यामुनाय** यामुनाय नमो नमः ।। **नमोऽचिन्त्याद्-भुता-क्लिष्ट-**ज्ञान-वैराग्य-राशये । **नाथाय मुनयेऽगाध-** भगवद्-भक्ति-सिन्धवे ।।१।। **तस्मै नमो मधु-जिदङ्घ्रि-सरोज-तत्त्व-**ज्ञानानुराग-महिमाति-शयान्त-सीम्ने । **नाथाय नाथ-मुनयेऽत्र परत्र चापि** नित्यं यदीय-

चरणौ शरणं मदीयम् ।।२।। **भूयो नमोऽपरि-मिताच्युत-भक्ति-तत्त्व-ज्ञानामृताब्धि-परिवाह-शुभै-र्वचोभिः । लोकेऽवतीर्ण-परमार्थ-समग्र-भक्ति-**योगाय नाथ-मुनये यमिनां वराय ।।३।। **तत्त्वेन यश्चिद-चिदीश्वर-तत्स्वभाव-**भोगापवर्ग-तदुपाय-गती-रुदारः । **सन्दर्शयन्-निर-मिमीत पुराण-रत्नं** तस्मै नमो मुनि-वराय पराशराय ।।४।। **माता पिता युवतय-स्तनया विभूतिः** सर्वं यदेव नियमेन मदन्व-यानाम् । **आद्यस्य नः कुलपते-र्वकुलाभि-रामं** श्रीमत् तदङ्घ्रि-युगलं प्रणमामि मूर्ध्ना ।।५।। **यन्मूर्ध्नि मे श्रुति-शिरस्सु च भाति यस्मिन्** अस्मन्-मनोरथ-पथः सकलः समेति । **स्तोष्यामि नः कुल-धनं कुल-दैवतं तत्** पादार-विन्द-मरविन्द-विलोचनस्य ।।६।। **तत्त्वेन यस्य महिमार्णव-शीकराणुः** शक्यो न मातुमपि शर्व-पितामहाद्यैः। **कर्तुं तदीय-महिम-स्तुति-मुद्यताय** मह्यं नमोऽस्तु कवये निरपत्र-पाय ।।७।। **यद्वा श्रमावधि यथामति वाप्य-शक्तः** स्तौम्येव-मेव खलु तेऽपि सदा स्तुवन्तः । **वेदाश्चतुर्-मुख-मुखाश्च महार्णवान्तः** को मज्जतो-रणु-कुलाचलयो-र्विशेषः ।।८।। **किं चैष शक्त्यति-शयेन न तेऽनुकम्प्यः** स्तोतापि तु स्तुति-कृतेन परिश्रमेण । **तत्र श्रमस्तु सुलभो मम मन्दबुद्धेः** इत्युद्यमोऽयमु-चितो मम चाब्जनेत्र ।।९।। **नावेक्षसे यदि ततो भुवनान्य-मूनि** नालं प्रभो भवितु-मेव कुतः प्रवृत्तिः । **एवं निसर्ग-सुहृदि त्वयि सर्व-जन्तोः** स्वामिन् विचित्र-मिद-माश्रित-वत्सलत्वम् ।।१०।। **स्वाभाविका-नवधि-काति-शयेशि-तृत्वं** नारायण त्वयि न मृष्यति वैदिकः कः । **ब्रह्मा शिवः शतमखः परम-स्वराडित्येतेऽपि यस्य महिमार्णव-विप्रु-षस्ते ।।११।। कः**

श्रीः श्रियः परम-सत्त्व-समाश्रयः कः कः पुण्डरीक-नयनः पुरुषोत्तमः कः । **कस्या-युतायुत-शतैक-कलांश-कांशे** विश्वं विचित्र-चिदचित्-प्रविभाग-वृत्तम् ।।१२।। **वेदाप-हार-गुरुपातक-दैत्य-पीडा-द्यापद्-विमोचन-महिष्ठ-फल-प्रदानैः । कोऽन्यः प्रजा-पशु-पती परिपाति कस्य** पादो-दकेन स शिवः स्वशिरो-धृतेन ।।१३।। **कस्योदरे हर-विरिञ्चि-मुखः प्रपञ्चः** को रक्षती-मम-जनिष्ट च कस्य नाभेः। **क्रान्त्वा निगीर्य पुनरुद्-गिरति त्वदन्यः** कः केन वैष परवा-निति शक्य-शङ्कः ।।१४।। **त्वां शील-रूप-चरितैः परम-प्रकृष्ट-**सत्त्वेन सात्विक-तया प्रबलैश्च शास्त्रैः । **प्रख्यात-दैव-परमार्थ-विदां मतैश्च** नैवासुर-प्रकृतयः प्रभवन्ति बोद्धुम् ।।१५।। **उल्लङ्घित-त्रिविध-सीम-समाति-शायि-**सम्भावनं तव परि-व्रढिम-स्वभावम् । **माया-बलेन भवतापि निगूह्य-मानं** पश्यन्ति केचि-दनिशं त्वदनन्य-भावाः ।।१६।। **यदण्ड-मण्डान्तर-गोचरं च यद्** दशोत्तराण्या-वरणानि यानि च । **गुणाः प्रधानं पुरुषः परं पदं** परात्परं ब्रह्म च ते विभूतयः ।।१७।। **वशी वदान्यो गुणवा-नृजुः शुचिः** मृदुर्-दयालु-र्मधुरः स्थिरः समः। **कृती कृतज्ञ-स्त्वमसि स्वभावतः** समस्त-कल्याण-गुणामृतो-दधिः ।।१८।। **उपर्यु-पर्यब्ज-भुवोऽपि पूरुषान्** प्रकल्प्य ते ये शत-मित्यनु-क्रमात् । **गिरस्त्व-देकैक-गुणाव-धीप्सया** सदास्थिता नो-द्यमतोऽतिशेरते ।।१९।। **त्वदा-श्रितानां जगदुद्भव-स्थिति-**प्रणाश-संसार-विमोचनादयः । **भवन्ति लीला-विधयश्च वैदिकाः** त्वदीय-गम्भीर-मनोऽनुसारिणः ।।२०।। **नमो नमो वाङ्-मनसाति-भूमये** नमो नमो वाङ्-मनसैक-भूमये । **नमो नमोऽनन्त-महा-विभूतये**

नमो नमोऽनन्त-दयैक-सिन्धवे ।।२१।। **न धर्म-निष्ठोऽस्मि न चात्मवेदी** न भक्तिमान् त्वच्-चरणा-रविन्दे। **अकिञ्चनोऽनन्य-गतिः शरण्य** त्वत्-पाद-मूलं शरणं प्रपद्ये ।।२२।। **न निन्दितं कर्म तदस्ति लोके** सहस्त्रशो यन्न मया व्यधायि । **सोऽहं विपाका-वसरे मुकुन्द** क्रन्दामि सम्प्रत्य-गति-स्तवाग्रे ।।२३।। **निमज्जतोऽनन्त-भवार्ण-वान्तः** चिराय मे कूल-मिवासि लब्धः । **त्वयापि लब्धं भगवन् इदानीम्** अनुत्तमं पात्र-मिदं दयायाः ।।२४।। **अभूत-पूर्वं मम भावि किं वा** सर्वं सहे मे सहजं हि दुःखम् । **किन्तु त्वदग्रे शरणा-गतानां** पराभवो नाथ न तेऽनुरूपः ।।२५।। **निरास-कस्यापि न ताव-दुत्सहे** महेश हातुं तव पाद-पङ्कजम् । **रूषा निरस्तोऽपि शिशुः स्तनन्धयो** न जातु मातु-श्चरणौ जिहासति ।।२६।। **तवामृत-स्यन्दिनि पाद-पङ्कजे** निवेशि-तात्मा कथमन्य-दिच्छति । **स्थितेऽरविन्दे मकरन्द-निर्भरे** मधुव्रतो नेक्षु-रकं हि वीक्षते ।।२७।। **त्वदङ्घ्रि-मुद्दिश्य कदापि केनचिद्** यथा तथा वापि सकृत् कृतोऽञ्जलिः। **तदैव मुष्णात्य-शुभान्य-शेषतः** शुभानि पुष्णाति न जातु हीयते ।।२८।। **उदीर्ण-संसार-दवाशु-शुक्षणिं** क्षणेन निर्व्याप्य परां च निर्वृतिम् । **प्रयच्छति त्वच्-चरणा-रुणाम्बुज-द्वयानु-रागामृत-सिन्धु-शीकरः** ।।२९।। **विलास-विक्रान्त-परावरा-लयं** नमस्य-दार्ति-क्षपणे कृत-क्षणम् । **धनं मदीयं तव पाद-पङ्कजं** कदा नु साक्षात्-करवाणि चक्षुषा ।।३०।। **कदा पुनः शङ्ख-रथाङ्ग-कल्पक-ध्वजार-विन्दाङ्कुश-वज्र-लाञ्छनम् । त्रिविक्रम त्वच्-चरणाम्बुज-द्वयं** मदीय-मूर्धान-मलङ्करिष्यति ।।३१।। **विराज-मानोज्ज्वल-पीत-वाससं** स्मिता-

तसी-सून-समाम-लच्छविम् । **निमग्न-नाभिं तनु-मध्य-मुन्नतं** विशाल-वक्षः स्थल-शोभि-लक्षणम् ।।३२।। **चकासतं ज्याकिण-कर्कशैः शुभैः** चतुर्भि-राजानु-विलम्बिभिर्-भुजैः । **प्रिया-वतंसोत्पल-कर्ण-भूषण-**श्लथाल-काबन्ध-विमर्द-शंसिभिः ।।३३।। **उदग्र-पीनांस-विलम्बि-कुण्डला-**लकावली-बन्धु-रकम्बु-कन्धरम् । **मुख-श्रिया न्यक्कृत-पूर्ण-निर्मला-**मृतांशु-बिम्बाम्बु-रुहो-ज्ज्वल-श्रियम् ।।३४।। **प्रबुद्ध-मुग्धाम्बुज-चारु-लोचनं** सविभ्रम-भ्रू-लत-मुज्ज्वलाधरम् । **शुचिस्मितं कोमल-गण्ड-मुन्नसं** ललाट-पर्यन्त-विलम्बि-तालकम् ।।३५।। **स्फुरत्-किरीटाङ्गद-हार-कण्ठिका-**मणीन्द्र-काञ्ची-गुण-नूपुरादिभिः। **रथाङ्ग-शङ्खासि-गदा-धनुर्वरैः** लसत्तुलस्या-वनमाल-योज्ज्वलम् ।।३६।। **चकर्थ यस्या भवनं भुजान्तरं** तव प्रियं धाम यदीय-जन्मभूः। **जगत् समस्तं यदपाङ्ग-संश्रयं** यदर्थ-मम्भोधि-रमन्थ्य-बन्धि च ।।३७।। **स्व-वैश्व-रूप्येण सदाऽनुभूतया-**प्यपूर्ववद्-विस्मय-माद-धानया । **गुणेन रूपेण विलास-चेष्टितैः** सदा तवैवो-चितया तव श्रिया ।।३८।। **तया सहासीन-मनन्त-भोगिनि** प्रकृष्ट-विज्ञान-बलैक-धामनि । **फणा-मणि-त्रात-मयूख-मण्डल-**प्रकाश-मानोदर-दिव्य-धामनि ।।३९।। **निवास-शय्यासन-पादुकांशुको-**पधान-वर्षातप-वारणादिभिः। **शरीर-भेदैस्-तव शेषतां गतैर्-**यथोचितं शेष इतीर्यते जनैः ।।४०।। **दासः सखा वाहन-मासनं ध्वजो** यस्ते वितानं व्यजनं त्रयीमयः । **उपस्थितं तेन पुरो गरुत्मता** त्वदङ्घ्रि-सम्मर्द-किणाङ्क-शोभिना ।।४१।। **त्वदीय-भुक्तोज्झित-शेष-भोजिना** त्वया निवृष्टात्म-भरेण यद्यथा । **प्रियेण सेना-पतिना न्यवेदि तत्तथाऽ-**

नुजानन्त-मुदार-वीक्षणैः ।।४२।। **हताखिल-क्लेश-मलैः स्वभावतः** सदानु-कूल्यैक-रसैस्त-वोचितैः । **गृहीत-तत्तत्-परिचार-साधनैर्-** निषेव्य-माणं सचिवैर्-यथोचितम् ।।४३।। **अपूर्व-नाना-रस-भाव-निर्भर-प्रबद्धया** मुग्ध-विदग्ध-लीलया । **क्षणाणुवत्-क्षिप्त-परादि-कालया** प्रहर्षयन्तं महिषीं महाभुजम् ।।४४।। **अचिन्त्य-दिव्याद्भुत-नित्य-यौवन-**स्वभाव-लावण्य-मया-मृतोदधिम् । **श्रियः श्रियं भक्त-जनैक-जीवितं** समर्थ-मापत्-सख-मर्थि-कल्पकम् ।।४५।। **भवन्त-मेवानुचरन् निरन्तर-**प्रशान्त-निःशेष-मनोरथान्तरः। **कदाह-मैकान्तिक-नित्य-किङ्करः** प्रहर्ष-यिष्यामि सनाथ-जीवितः ।।४६।। **धिग्-शुचि-मविनीतं निर्दयं माम-लज्जं** परम-पुरुष योऽहं योगि-वर्याग्र-गण्यैः । **विधि-शिव-सनकाद्यैर्-ध्यातु-मत्यन्त-दूरं** तव परिजन-भावं कामये कामवृत्तः ।।४७।। **अपराध-सहस्र-भाजनं** पतितं भीम-भवार्ण-वोदरे । **अगतिं शरणागतं हरे** कृपया केवल-मात्मसात् कुरु ।।४८।। **अविवेक-घनान्ध-दिङ्-मुखे** बहुधा सन्तत-दुःख-वर्षिणि । **भगवन् भव-दुर्दिने पथ-**स्खलितं मा-मवलोक-याच्युत ।।४९।। **न मृषा परमार्थ-मेव मे** शृणु विज्ञापन-मेक-मग्रतः । **यदि मे न दयिष्यसे ततो** दयनीय-स्तव नाथ दुर्लभः ।।५०।। **तदहं त्वदृते न नाथवान्** मदृते त्वं दयनीय-वान् न च । **विधि-निर्मित-मेतदन्यं** भगवन् पालय मा स्म जैह्ययया ।।५१।। **वपुरादिषु योऽपि कोऽपि वा** गुणतोऽसानि यथा-तथा-विधः । **तदयं तव पाद-पद्मयोः** अहमद्यैव मया समर्पितः ।।५२।। **मम नाथ यदस्ति योऽस्म्यहं** सकलं तद्धि तवैव माधव । **नियत-स्वमिति प्रबुद्ध-धीः**

अथवा किं नु समर्पयामि ते ।।५३।। **अवबोधित-वानिमां यथा** मयि नित्यां भवदीयतां स्वयम् । **कृपयैव-मनन्य-भोग्यतां** भगवन् भक्ति-मपि प्रयच्छ मे ।।५४।। **तव-दास्य-सुखैक-सङ्गिनां** भवनेष्व-स्त्वपि कीट-जन्म मे । **इतरा-वसथेषु मास्म भू-**दपि मे जन्म चतुर्मुखात्मना ।।५५।। **सकृत् त्वदाकार-विलोक-नाशया** तृणीकृता-नुत्तम-भुक्ति-मुक्तिभिः । **महात्मभिर्-मामवलोक्यतां नय** क्षणेऽपि ते यद् विरहोऽतिदुस्सहः ।।५६।। **न देहं न प्राणान्न च सुख-मशेषा-भिलषितं** न चात्मानं नान्यत् किमपि तव शेषत्व-विभवात् । **बहिर्भूतं नाथ क्षणमपि सहे यातु शतधा** विनाशं तत्सत्यं मधु-मथन विज्ञापन-मिदम् ।।५७।। **दुरन्त-स्यानादे-रपरिहरणी-यस्य महतो** विहीना-चारोऽहं नृप-शुर-शुभस्या-स्पदमपि । **दया-सिन्धो बन्धो निरवधिक-वात्सल्य-जलधे** तव स्मारं स्मारं गुणगण-मितीच्छामि गतभीः ।।५८।। **अनिच्छन्नप्येवं यदि पुनरिती-च्छन्निव रजः** तमश्छन्न-च्छद्म-स्तुति-वचन-भङ्गी-मरचयम् । **तथा-पीत्थं रूपं वचन-मवलम्ब्यापि कृपया** त्वमेवैवं भूतं धरणि-धर मे शिक्षय मनः ।।५९।। **पिता त्वं माता त्वं दयित तनयस्त्वं प्रियसुहृत्** त्वमेव त्वं मित्रं गुरुरसि गतिश्चासि जगताम् । **त्वदीय-स्त्वद्-भृत्य-स्तव परिजन-स्त्वद्-गति-रहं** प्रपन्न-श्चैवं सत्यहमपि तवैवास्मि हि भरः ।।६०।। **जनित्वाऽहं वंशे महति जगति ख्यात-यशसां** शुचीनां युक्तानां गुण-पुरुष-तत्त्व-स्थिति-विदाम् । **निसर्गा-देव त्वच्चरण-कमलैकान्त-मनसाम्** अधोधः पापात्मा शरणद निमज्जामि तमसि ।।६१।। **अमर्यादः क्षुद्र-श्चलमति-रसूया-प्रसवभूः** कृतघ्नो दुर्मानी स्मर-परवशो

वञ्चनपरः । **नृशंसः पापिष्टः कथ-मह-मितो दुःख-जलधेः** अपारा-दुत्तीर्ण-स्तव परिचरेयं चरणयोः ।।६२।। **रघुवर यदभूस्त्वं तादृशो वायसस्य** प्रणत इति दयालुर्-यच्च चैद्यस्य कृष्णः। **प्रतिभव-मपराद्धुर्-मुग्ध-सायुज्य-दोऽभूः** वद किमपद-मागस्तस्य तेऽस्ति क्षमायाः ।।६३।। **ननु प्रपन्नः सकृदेव नाथ** तवाह-मस्मीति च याचमानः। **तवानुकम्प्यः स्मरतः प्रतिज्ञां** मदेक-वर्जं किमिदं व्रतं ते ।।६४।। **अकृत्रिम-त्वच्-चरणा-रविन्द-प्रेम-प्रकर्षा-वधि-मात्म-वन्तम् । पितामहं नाथ-मुनिं विलोक्य** प्रसीद मद्-वृत्त-मचिन्त-यित्वा ।।६५।। **यत्-पदाम्भो-रुह-ध्यान-**विध्वस्ता-शेष-कल्मषः। **वस्तुता-मुप-यातोऽहं** यामुनेयं नमामि तम् ।। **ओं तत्सत् ।।**

।। श्रीकुरेशाचार्यानुगृहीतः श्रीस्तवः ।।

स्वस्ति श्रीर्-दिशता-दशेष-जगतां स्वर्गाप-वर्ग-स्थितीः स्वर्गं दुर्गति-माप-वर्गिक-पदं सर्वं च कुर्वन् हरिः । **यस्या वीक्ष्य मुखं तदिङ्गित-पराधीनो विधत्तेऽखिलं** क्रीडेयं खलु नान्यथाऽस्य रसदा स्यादैक-रस्यात् तया ।।१।। **हे श्रीर्देवि समस्त-लोक-जननि त्वां स्तोतु-मीहा-महे** युक्तां भावय भारतीं प्रगुणय प्रेम-प्रधानां धियम् । **भक्तिं बन्धय नन्द-याश्रित-मिमं दासं जनं तावकं** लक्ष्यं लक्ष्मि कटाक्ष-वीचि-विसृतेस्ते स्याम चामी वयम् ।।२।। **स्तोत्रं नाम किमा-मनन्ति कवयो यद्यन्य-दीयान् गुणा-**नन्यत्र त्वसतोऽधिरोप्य भणितिः सा तर्हि वन्ध्या त्वयि । **सम्यक्-सत्य-गुणाभि-वर्णन-मथो ब्रूयुः कथं तादृशी** वाग्-वाचस्पति-नाप्य-शक्य-रचना त्वत्-सद्-गुणार्णो-निधौ ।।३।। **ये वाचां मनसां च दुर्ग्रह-तया ख्याता गुणास्-**

तावकाः तानेव प्रति साम्बु-जिह्म-मुदिता यन्मा-मिका भारती । **हास्यं तत्तु न मन्महे न हि चकोर्येकाऽखिलां** चन्द्रिकां नालं पातु-मिति प्रगृह्य रसना-मासीत सत्यां तृषि ।।४।। **क्षोदीया-नपि दुष्ट-बुद्धि-रपि निःस्नेहोऽप्य-नीहोऽपि ते** कीर्तिं देवि लिहन्नहं न च बिभेम्-यज्ञो न जिह्रेमि च । **दुष्येत् सा तु न तावता न हि शुना लीढाऽपि भागीरथी** दुष्येच्-चापि न लज्जते न च बिभे-त्यार्ति-स्तु शाम्ये-च्छुनः ।।५।। **ऐश्वर्यं महदेव वाऽल्प-मथवा दृश्येत पुंसां हि यत्** तल्लक्ष्म्याः समु-दीक्षणात् तव यतः सार्वत्रिकं वर्तते । **तेनै-तेन न विस्मये-महि जगन्नाथोऽपि नारायणो** धन्यं मन्यत ईक्षणात् तव यतः स्वात्मान-मात्मेश्वरः ।।६।। **ऐश्वर्यं यदशेष-पुंसि यदिदं सौन्दर्य-लावण्ययो** रूपं यच्च हि मङ्गलं किमपि यल्लोके सदित्युच्यते। **तत्सर्वं त्वदधीन-मेव यदतः श्रीरित्य-भेदेन वा** यद्वा श्रीमदि-तीदृशेन वचसा देवि प्रथा-मश्नुते ।।७।। **देवि त्वन्-महिमा-वधिर्न हरिणा नापि त्वया ज्ञायते** यद्यप्येव-मथापि नैव युवयोः सर्वज्ञता हीयते । **यन्नास्त्येव तदज्ञता-मनु-गुणां सर्वज्ञ-ताया विदुः** व्योमामभोज-मिदन्तया खलु विदन् भ्रान्तोऽय-मित्युच्यते ।।८।। **लोके वनस्पति-बृहस्पति-तारतम्यं** यस्याः कटाक्ष-परिणाम-मुदाहरन्ति । **सा भारती भगवती तु यदीय-दासी** तां देवदेव-महिषीं श्रिय-माश्रयामः ।।९।। **यस्याः कटाक्ष-मृदु-वीक्षण-दीक्षितेन** सद्यः समुल्लसित-पल्लव-मुल्ललास । **विश्वं विपर्यय-समुत्थ-विपर्ययं त्वां** तां देवदेव-महिषीं श्रिय-माश्रयामः ।।१०।।

।। श्रीकुलशेखरकृतं मुकुन्दमालास्तोत्रम् ।।

श्रीवल्लभेति वरदेति दयापरेति भक्त-प्रियेति भव-लुण्ठन-कोविदेति।

नाथेति नाग-शयनेति जगन्निवासे- त्यालापिनं प्रतिदिनं कुरु मां मुकुन्द ।।१।। **जयतु जयतु देवो देवकी-नन्दनोऽयं** जयतु जयतु कृष्णो वृष्णि-वंश-प्रदीपः । **जयतु जयतु मेघ-श्यामलः कोमलाङ्गो** जयतु जयतु पृथ्वी-भार-नाशो मुकुन्दः ।।२।। **मुकुन्द मूर्ध्ना प्रणिपत्य याचे** भवन्त-मेकान्त-मियन्त-मर्थम् । **अविस्मृति-स्त्वच्-चरणार-विन्दे** भवे भवे मेऽस्तु भवत्-प्रसादात् ।।३।। **नाहं वन्दे तव चरणयोर्-द्वन्द्व-मद्वन्द्व-हेतोः** कुम्भी-पाकं गुरुमपि हरे नारकं नाप-नेतुम् । **रम्या-रामा-मृदु-तनु-लता नन्दने नापि रन्तुं** भावे भावे हृदय-भवने भाव-येयं भवन्तम् ।।४।। **नास्था धर्मे न वसु-निचये नैव कामोप-भोगे** यद् भाव्यं तद् भवतु भगवन् पूर्व-कर्मानु-रूपम् । **एतत् प्रार्थ्यं मम बहुमतं जन्म-जन्मान्तरेऽपि** त्वत्-पादाम्भो-रुह-युगगता निश्चला भक्ति-रस्तु ।।५।। **दिवि वा भुवि वा ममास्तु वासो** नरके वा नर-कान्तक प्रकामम् । **अवधीरित-शारदार-विन्दौ** चरणौ ते मरणेऽपि चिन्तयामि ।।६।। **कृष्ण त्वदीय-पद-पङ्कज-पञ्जरान्तम्** अद्यैव मे विशतु मानस-राजहंसः । **प्राण-प्रयाण-समये कफ-वात-पित्तैः** कण्ठा-वरोधन-विधौ स्मरणं कुतस्ते ।।७।। **चिन्तयामि हरिमेव सन्ततं** मन्द-हास-मुदिता-ननाम्बुजम् । **नन्दगोप-तनयं परात्परं** नारदादि-मुनि-वृन्द-वन्दितम् ।।८।। **कर-चरण-सरोजे कान्तिमन्-नेत्र-मीने** श्रम-मुषि भुज-वीचि-व्याकुलेऽगाध-मार्गे । **हरि-सरसि विगाह्या-पीय तेजो-जलौघं** भव-मरु-परिखिन्नः क्लेश-मद्य त्यजामि ।।९।। **सरसिज-नयने सशङ्ख-चक्रे** मुरभिदि मा विरमस्व चित्त रन्तुम् । **सुखतर-मपरं न जातु जाने** हरिचरण-

स्मरणामृतेन तुल्यम् ।।१०।। **माभीर्-मन्द-मनो विचिन्त्य बहुधा यामीश्चिरं यातनाः** नामी नः प्रभवन्ति पाप-रिपवः स्वामी ननु श्रीधरः। **आलस्यं व्यपनीय भक्ति-सुलभं ध्यायस्व नारायणं** लोकस्य व्यसना-पनोदन-करो दासस्य किं न क्षमः ।।११।। **भव-जलधि-गतानां द्वन्द्व-वाता-हतानां** सुत-दुहितृ-कलत्र-त्राण- भारार्दि-तानाम् । **विषम-विषय-तोये मज्जता-मप्लवानां** भवतु शरण-मेको विष्णु-पोतो नराणाम् ।।१२।। **भव-जलधि-मगाधं दुस्तरं निस्तरेयं** कथमह-मिति चेतो मा स्म गाः कातरत्वम् । **सरसिज-दृशि देवे तारकी भक्ति-रेका** नरकभिदि निषण्णा तारयिष्यत्यवश्यम् ।।१३।। **तृष्णा-तोये मदन-पवनोद्धूत-मोहोर्मि-माले** दारावर्ते तनय-सहज-ग्राह-सङ्काकुले च । **संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्** पादाम्भोजे वरद भवतो भक्ति-नावं प्रयच्छ ।।१४।। **माद्राक्षं क्षीण-पुण्यान् क्षण-मपि भवतो भक्ति-हीनान् पदाब्जे** माश्रौषं श्राव्य-बन्धं तव चरित-मपास्यान्य-दाख्यान-जातम् । **मास्मार्षं माधव त्वामपि भुवनपते चेतसा-पह्नु-वानान्** माभूवं त्वत्-सपर्या-परिकर-रहितो जन्म-जन्मान्तरेऽपि ।।१५।। **जिह्वे कीर्तय केशवं मुर-रिपुं चेतो भज श्रीधरं** पाणि-द्वन्द्व समर्चयाच्युत-कथाः श्रोत्रद्वय त्वं शृणु । **कृष्णं लोकय लोचनद्वय हरेर्-गच्छाङ्घ्रि-युग्मालयं** जिघ्र घ्राण मुकुन्द-पाद-तुलसीं मूर्धन् नमाधो-क्षजम् ।।१६।। **हे लोकाः श्रुणुत प्रसूति-मरण-व्याधे-श्चिकित्सा-मिमां** योगज्ञाः समुदा-हरन्ति मुनयो यां याज्ञवल्क्यादयः। **अन्तर्ज्योति-रमेय-मेक-ममृतं कृष्णाख्य-मापीयतां** तत्पीतं परमौषधं वितनुते निर्वाण-मत्यन्तिकम् ।।१७।। **हे मर्त्याः परमं हितं श्रुणुत**

वो वक्ष्यामि सङ्क्षेपतः संसारार्णव-माप-दूर्मि-बहुलं सम्यक् प्रविश्य स्थिताः । **नाना-ज्ञान-मपास्य चेतसि नमो नारायणा-येत्यमुं** मन्त्रं सप्रणवं प्रणाम-सहितं प्रावर्तयध्वं मुहुः ।।१८।। **पृथ्वी-रेणु-रणुः पयांसि कणिकाः फल्गु-स्फुलिङ्गोऽनलः** तेजो निःश्वसनं मरुत् तनुतरं रन्ध्रं सुसूक्ष्मं नभः । **क्षुद्रा रुद्र-पितामह-प्रभृतयः कीटाः समस्ताः सुरा** दृष्टे यत्र स तावको विजयते भूमा-वधू-तावधिः ।।१९।। **बद्धे-नाञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः** कण्ठेन स्वर-गद्गदेन नयने-नोद्गीर्ण-बाष्पाम्बुना । **नित्यं त्वच्-चरणारविन्द-युगल-ध्यानामृता-स्वादिनाम्** अस्माकं सरसी-रुहाक्ष सततं सम्पद्यतां जीवितम् ।।२०।। **हे गोपालक हे कृपा-जलनिधे हे सिन्धु-कन्या-पते** हे कंसान्तक हे गजेन्द्र-करुणा-पारीण हे माधव । **हे रामानुज हे जगत्-त्रय-गुरो हे पुण्डरीकाक्ष मां** हे गोपी-जन-नाथ पालय परं जानामि न त्वां विना ।।२१।। **भक्तापाय-भुजङ्ग-गारुड-मणिस्-त्रैलोक्य-रक्षामणिः** गोपी-लोचन-चातकाम्बुद-मणिः सौन्दर्य-मुद्रा-मणिः । **यः कान्ता-मणि-रुक्मिणी-घन-कुच-द्वन्द्वैक-भूषा-मणिः** श्रेयो देव-शिखा-मणिर्-दिशतु नो गोपाल-चूडामणिः ।।२२।। **शत्रुच्-छेदैक-मन्त्रं सकल-मुपनिषद्-वाक्य-सम्पूज्य-मन्त्रं** संसारोत्तार-मन्त्रं समुचित-तमसः सङ्ग-निर्याण-मन्त्रम् । **सर्वैश्वर्यैक-मन्त्रं व्यसन-भुजग-सन्दष्ट-सन्त्राण-मन्त्रं** जिह्वे श्रीकृष्ण-मन्त्रं जप जप सततं जन्म-साफल्य-मन्त्रम् ।।२३।। **व्यामोह-प्रशमौषधं मुनि-मनोवृत्ति-प्रवृत्त्यौषधं** दैत्येन्द्रार्ति-करौषधं त्रिजगतां सञ्जीवनै-कौषधम् । **भक्तार्ति-प्रशमौषधं भव-भय-प्रध्वंसि दिव्यौषधं** श्रेयः-प्राप्ति-करौषधं पिब मनः श्रीकृष्ण-

दिव्यौषधम् ।।२४।। **आम्नायाभ्यसना-न्यरण्य-रुदितं वेद-व्रतान्यन्-वहं** मेदश्छेद-फलानि पूर्त-विधयः सर्वं हुतं भस्मनि । **तीर्थाना-मव-गाहनानि च गज-स्नानं विना यत्पद-**द्वन्द्वाम्भो-रुह-संस्मृतिं विजयते देवः स नारायणः ।।२५।। **श्रीमन्नाम प्रोच्य नारायणाख्यं** केन प्रापुर्-वाञ्छितं पापिनोऽपि । **हा नः पूर्वं वाक्प्रवृत्ता न तस्मिन्** तेन प्राप्तं गर्भ-वासादि-दुःखम् ।।२६।। **मज्जन्मनः फल-मिदं मधु-कैटभारे** मत्-प्रार्थनीय-मदनुग्रह एष एव । **त्वद् भृत्य-भृत्य-परिचारक-भृत्य-भृत्य-**भृत्यस्य भृत्य इति मां स्मर लोकनाथ ।।२७।। **नाथे नः पुरुषोत्तमे त्रिजगता-मेकाधिपे चेतसा** सेव्ये स्वस्य पदस्य दातरि परे नारायणे तिष्ठति । **यं कञ्चित् पुरुषाधमं कतिपय-ग्रामेश-मल्पार्थदं** सेवायै मृगया-महे नरमहो मूढा वराका वयम् ।।२८।। **मदन परिहर स्थितिं मदीये** मनसि मुकुन्द-पदारविन्द-धाम्नि । **हर-नयन-कृशानुना कृशोऽसि** स्मरसि न चक्र-पराक्रमं मुरारेः ।।२९।। **तत्त्वं ब्रूवाणानि परं परस्ताद्** मधु क्षरन्तीव मुदा-वहानि । **प्रवर्तय प्राञ्जलि-रस्मि जिह्वे** नामानि नारायण-गोचराणि ।।३०।। **इदं शरीरं परिणाम-पेशलं** पतत्य-वश्यं परिणाम-पेशलम् । **किमौषधैः क्लिश्यसि मूढ दुर्मते** निरामयं कृष्ण-रसायनं पिब ।।३१।। **दारा वाराकर-वरसुता ते तनूजो विरिञ्चिः** स्तोता वेदस्तव सुर-गणो भृत्यवर्गः प्रसादः । **मुक्तिर्-माया जगद-विकलं तावकी देवकी ते** माता मित्रं बलरिपु-सुतः तत्त्वदन्यं न जाने ।।३२।। **कृष्णो रक्षतु नो जगत्-त्रय-गुरुः कृष्णं नमध्वं सदा** कृष्णे-नाखिल-शत्रवो विनिहताः कृष्णाय तस्मै नमः । **कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं**

कृष्णे तिष्ठति विश्वमे-तदखिलं हे कृष्ण रक्षस्व माम् ।।३३।। **तत्त्वं प्रसीद भगवन् कुरु मय्यनाथे** विष्णो कृपां परम-कारुणिकः खलु त्वम् । **संसार-सागर-निमग्न-मनन्त दीनम्** उद्धर्तु-मर्हसि हरे पुरुषोत्तमोऽसि ।।३४।। **नमामि नारायण-पाद-पङ्कजं** करोमि नारायण-पूजनं सदा । **वदामि नारायण-नाम निर्मलं** स्मरामि नारायण-तत्त्व-मव्ययम् ।।३५।। **श्रीनाथ नारायण वासुदेव** श्रीकृष्ण भक्तप्रिय चक्रपाणे । **श्रीपद्मनाभाच्युत कैटभारे** श्रीराम पद्माक्ष हरे मुरारे ।।३६।। **अनन्त वैकुण्ठ मुकुन्द कृष्ण** गोविन्द दामोदर माधवेति । **वक्तुं समर्थोऽपि न वक्ति कश्चिद्** अहो जनानां व्यसनाभि-मुख्यम् ।।३७।। **ध्यायन्ति ये विष्णु-मनन्त-मव्ययं** हृत्-पद्म-मध्ये सततं व्यवस्थितम् । **समाहितानां सततामय-प्रदं** ते यान्ति सिद्धिं परमां तु वैष्णवीम् ।।३८।। **क्षीर-सागर-तरङ्ग-शीकरा-**सार-तार-कित-चारु-मूर्तये । **भोगि-भोग-शयनीय-शायिने** माधवाय मधु-विद्विषे नमः ।।३९।। **यस्य प्रियौ श्रुति-धरौ कवि-लोक-वीरौ मित्रे द्विजन्म-वरपद्म-शराव-भूताम् । तेनाम्बुजाक्ष-चरणाम्बुज-षट्पदेन राज्ञा कृता कृति-रियं कुल-शेखरेण ।।४०।। ओं तत्सत्।।**

।। श्रीहयग्रीवाष्टोत्तर-शतनाम-स्तोत्रम् ।।

विनियोगः — **ॐ अस्य श्री-हयग्रीव-स्तोत्र-मन्त्रस्य सङ्कर्षण ऋषिः, अनुष्टुप् छन्दः, श्रीहयग्रीवो देवता, ऋं बीजं, नमः शक्तिः, विद्यार्थे जपे विनियोगः।**

अथ ध्यानम् — **वन्दे पूरित-चन्द्र-मण्डल-गतं श्वेतार-विन्दासनं** मन्दाकिन्य-मृताब्धि-कुन्द-कुमुद-क्षीरेन्दु-हासं हरिम् । **मुद्रा-पुस्तक-**

शङ्ख-चक्र-विलसद् श्रीमद्-भुजा-मण्डितं नित्यं निर्मल-भारती-परिमलं विश्वेश-मश्चाननम् ।। **ऋग्-यजुः-साम-रूपाय** वेदाहरण-कर्मणे । **प्रणवोद्गीथ-वचसे** महाश्व-शिरसे नमः।।

।। श्रीहयग्रीवाय नमः ।।

ज्ञानानन्द-मयं देवं निर्मल-स्फटिका-कृतिम् । **आधारं सर्व-विद्यानां** हयग्रीव-मुपास्महे ।।१।। **हयग्रीवो महाविष्णुः** केशवो मधुसूदनः। **गोविन्दः पुण्डरीकाक्षो** विष्णुर्-विश्वम्भरो हरिः ।।२।। **आदीशः सर्व-वागीशः** सर्वाधारः सनातनः । **निराधारो निराकारो** निरीशो निरुपद्रवः ।।३।। **निरञ्जनो निष्कलङ्को** नित्य-तृप्तो निरामयः । **चिदानन्द-मयः साक्षी** शरण्यः सर्वदायकः ।।४।। **श्रीमान् लोक-त्रयाधीशः** शिवः सारस्वत-प्रदः । **वेदोद्धर्त्ता वेदनिधिः** वेदवेद्यः पुरातनः ।।५।। **पूर्णः पूरयिता पुण्यः** पुण्य-कीर्तिः परात्परः । **परमात्मा परञ्ज्योतिः** परेशः पारगः परः ।।६।। **सकलोप-निषद्-वेद्यो** निष्कलः सर्व-शास्त्र-कृत् । **अक्षमाला-ज्ञानमुद्रा-**युक्तहस्तो वरप्रदः ।।७।। **पुराण-पुरुषः श्रेष्ठः** शरण्यः परमेश्वरः । **शान्तो दान्तो जित-क्रोधो** जिता-मित्रो जगन्मयः ।।८।। **जरा-मृत्यु-हरो जीवो** जयदो जाड्य-नाशनः । **जप-प्रियो जप-स्तुत्यो** जपकृत् प्रियकृद् विभुः ।।९।। **विमलो विश्वरूपश्च** विश्व-गोप्ता विराट् स्वराट् । **विधि-विष्णु-शिव-स्तुत्यः** शान्तिदः क्षान्ति-कारकः ।।१०।। **श्रेयःप्रदः श्रुतिमयः** श्रेयसां पति-रीश्वरः। **अच्युतोऽनन्त-रूपश्च** प्राणदः पृथिवीपतिः ।।११।। **अव्यक्तो व्यक्त-रूपश्च** सर्व-साक्षी तमोहरः। **अज्ञान-नाशको ज्ञानी** पूर्ण-चन्द्र-सम-प्रभः ।।१२।। **ज्ञानदो**

वाक्पतिर्-योगी योगीशः सर्वकामदः । **योगारूढो महापुण्यः** पुण्यकीर्ति-रमित्रहा ।।१३।। **विश्व-साक्षी चिदाकारः** परमानन्द-कारकः । **महायोगी महामौनी** मुनीशः श्रेयसां निधिः ।।१४।। **हंसः परमहंसश्च** विश्व-गोप्ता विराट् स्वराट् । **शुद्ध-स्फटिक-सङ्काशो** जटा-मण्डल-संयुतः ।।१५।। **आदि-मध्यान्त-रहितः** सर्व-वागीश्वरेश्वरः । **प्रणवोद्गीथ-रूपश्च** वेदाहरण-कर्म-कृत् ।।१६।। **नाम्नाम् अष्टोत्तर-शतं** हयग्रीवस्य यः पठेत् । **स सर्ववेद-वेदाङ्ग-**शास्त्राणां पारगः कविः ।।१७।। **इद-मष्टोत्तर-शतं नित्यं** मूढोऽपि यः पठेत् । **वाचस्पति-समो बुद्ध्या** सर्व-विद्या-विशारदः ।।१८।। **महदैश्वर्य-माप्नोति** कलत्राणि च पुत्रकान् । **नश्यन्ति सकलान् रोगान्** अन्ते हरिपुरं व्रजेत् ।।१९।। **ओं तत्सत् ।।**

।। श्रीवरवरमुनिकृतं श्रीराम-मङ्गलाशासनम् ।।

मङ्गलं कौसलेन्द्राय महनीय गुणात्मने । **चक्रवर्ति-तनूजाय** सार्व-भौमाय मङ्गलम् ।।१।। **वेद-वेदान्त-वेद्याय** मेघ-श्यामल-मूर्तये । **पुंसां मोहन-रूपाय** पुण्य-श्लोकाय मङ्गलम् ।।२।। **विश्वामित्रान्त-रङ्गाय** मिथिला-नगरीपतेः । **भाग्यानां परिपाकाय** भव्य-रूपाय मङ्गलम् ।।३।। **पितृ-भक्ताय सततं** भातृभिः सह सीतया । **नन्दिताखिल-लोकाय** रामभद्राय मङ्गलम् ।।४।। **त्यक्त-साकेत-वासाय** चित्रकूट-विहारिणे । **सेव्याय सर्व-यमिनां** धीरोदात्ताय मङ्गलम् ।।५।। **सौमित्रिणा च जानक्या** चाप-बाणासि-धारिणे । **संसेव्याय सदा भक्त्या** स्वामिने मम मङ्गलम् ।।६।। **दण्डकारण्य-वासाय** खर-दूषण-शत्रवे । **गृध्रराजाय भक्ताय** मुक्ति-दायास्तु मङ्गलम् ।।७।।

सादरं शबरी-दत्त-फल-मूलाभि-लाषिणे । **सौलभ्य-परिपूर्णाय** सत्यो-द्रिक्ताय मङ्गलम् ।।८।। **हनुमत्-समवेताय** हरीशाभीष्ट-दायिने । **वालि-प्रमथ-नायास्तु** महाधीराय मङ्गलम् ।।९।। **श्रीमते रघुवीराय** सेतू-ल्लङ्घित-सिन्धवे । **जित-राक्षस-राजाय** रणधीराय मङ्गलम् ।।१०।। **विभीषण-कृते प्रीत्या** लङ्काभीष्ट-प्रदायिने । **सर्व-लोक-शरण्याय** श्रीराघवाय मङ्गलम् ।।११।। **आगत्य नगरीं दिव्याम्** अभिषिक्ताय सीतया । **राजाधि-राज-राजाय** रामभद्राय मङ्गलम् ।।१२।। **ब्रह्मादि-देव-सेव्याय** ब्रह्मण्याय महात्मने । **जानकी-प्राण-नाथाय** रघुनाथाय मङ्गलम् ।।१३।। **श्रीसौम्यजा-मातृ-मुनेः** कृपया-स्मानु-पेयुषे । **महते मम नाथाय** रघुनाथाय मङ्गलम् ।।१४।। **मङ्गला-शासन-परैः** मदाचार्य-पुरोगमैः । **सर्वैश्च पूर्वै-राचार्यैः** सत्-कृतायास्तु मङ्गलम् ।।१५।। **रम्यजा-मातृ-मुनिना** मङ्गला-शासनं कृतम् । **त्रैलोक्या-धिपतिः श्रीमान्** करोतु मङ्गलं सदा ।।१६।।

।। श्रीवेदान्त-देशिक-कृतं सुदर्शनाष्टकम् ।।

श्रीमान् वेङ्कट-नाथार्यः कवि-तार्किक-केसरी । **वेदान्ताचार्य-वर्यो मे** सन्निधत्तां सदा हृदि ।। **प्रतिभट-श्रेणि-भीषण वरगुण-स्तोम-भूषण** जनि-भय-स्थान-तारण जगदव-स्थान-कारण । **निखिल-दुष्कर्म-कर्शन निगम-सद्धर्म-दर्शन** जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ।।१।। **शुभ-जगद् रूप-मण्डन सुर-गण-त्रास-खण्डन** शत-मख-ब्रह्म-वन्दित शतपथ-ब्रह्म-नन्दित । **प्रथित-विद्वत्स-पक्षित भज-दहिर्-बुध्न्य-लक्षित** जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ।।२।। **स्फुट-तटिज्जाल-पिञ्जर पृथुतर-ज्वाल-पञ्जर** परिगत-

प्रत्न-विग्रह पतुतर-प्रज्ञदुर्ग्रह । **प्रहरण-ग्राम-मण्डित परिजन-त्राण-पण्डित** जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ।।३।। **निजपद-प्रीत-सद्गण निरुपधि-स्फीत-षड्गुण** निगम-निर्व्यूढ-वैभव निजपर-व्यूह-वैभव । **हरिहय-द्वेषि-दारण हरपुर-प्लोष-कारण** जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ।।४।। **दनुज-विस्तार-कर्तन जनित-मित्रा-विकर्तन** दनुज-विद्या-निकर्तन भज-दविद्या-निवर्तन । **अमर-दृष्टस्व-विक्रम समर-जुष्टभ्र-मिक्रम** जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ।।५।। **प्रथिमु-खालीढ-बन्धुर पृथु-महाहेति-दन्तुर** विकट-माया-बहिष्कृत विविध-माला-परिष्कृत । **स्थिर-महा-यन्त्र-तन्त्रित दृढ-दया-तन्त्र-यन्त्रित** जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ।।६।। **महित-सम्पत्-सदक्षर विहित-सम्पत्-षडक्षर** षडर-चक्र-प्रतिष्ठित सकल-तत्त्व-प्रतिष्ठित । **विविध-सङ्कल्प-कल्पक विबुध-सङ्कल्प-कल्पक** जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ।।७।। **भुवन-नेत्र त्रयी-मय सवन-तेजस्-त्रयी-मय** निरवधि-स्वादु-चिन्मय निखिल-शक्ते जगन्मय। **अमित-विश्व-क्रिया-मय शमित-विश्वग्-भयामय** जय जय श्रीसुदर्शन जय जय श्रीसुदर्शन ।।८।। **द्वि-चतुष्क-मिदं प्रभूत-सारं** पठतां वेङ्कट-नायक प्रणीतम् । **विषमेऽपि मनोरथः प्रधावद्** न विहन्येत रथाङ्ग-धुर्य-गुप्तः ।। **ओं तत्सत् ।।**

।। श्रीपराशर-भट्ट-कृतं श्रीगुण-रत्नकोशः ।।

श्रीपराशरभट्टार्यः श्रीरङ्गेशपुरोहितः। श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे ।। श्रियै समस्तचिदचिद्विधानव्यसनं हरेः। अङ्गीकारिभिरालोकैः सार्थयन्त्यै कृतोऽञ्जलिः ।।१।। उल्लासपल्लवितपालितसप्तलोकीनिर्वाहकोरकित-

नेमकटाक्षलीलाम्। श्रीरङ्गहर्म्यतलमङ्गलदीपरेखां श्रीरङ्गराजमहिषीं श्रियमाश्रयामः ।।२।। अनुकलतनुकाण्डालिङ्गनारम्भशुम्भत् प्रतिदिशभुजशाखश्रीसखानोकहर्द्धिः। स्तननयनगुलुच्छस्फारपुष्पद्विरेफाः रचयतु मयि लक्ष्मीकल्पवल्ली कटाक्षान् ।।३।। यद्भ्रूभङ्गाः प्रमाणं स्थिरचररचनातारतम्ये मुरारेर्वेदान्तास्तत्त्वचिन्तां मुरभिदुरसि यत्पादचिह्नैस्तरन्ति। भोगोपोद्घातकेलीचुलकितभगवद्वैश्वरूप्यानुभावा सा नः श्रीरास्तृणीताममृतलहरिधीलङ्घनीयैरपाङ्गैः ।।४।। यद्यावत्तववैभवं तदुचितस्तोत्राय दूरे स्पृहा स्तोतुं के वयमित्यदश्च जगृहुः प्राञ्चो विरिञ्चादयः। अप्येवं तव देवि वाङ्मनसयोर्भाषानभिज्ञं पदं का वाचः प्रयतामहे कवयितुं स्वस्ति प्रशस्त्यै गिराम् ।।५।। स्तोतारं तमुशन्ति देवि कवयो यो विस्तृणीते गुणान् स्तोतव्यस्य ततश्च ते स्तुतिधुरामय्येव विश्राम्यति। यस्मादस्मदमर्षणीयफणितिस्वीकारतस्ते गुणाः क्षान्त्यौदार्यदयादयो भगवति स्वां प्रस्नुवीरन् प्रथाम् ।।६।। सूक्तिं समग्रयतु नः स्वयमेव लक्ष्मीः श्रीरङ्गराजमहिषी मधुरैः कटाक्षैः। वैदग्ध्यवर्णगुणगुम्भनगौरवैर्यां कण्डूलकर्णकुहराः कवयो धयन्ति ।।७।। अनाघ्रातावद्यं बहुगुणपरीणाहि मनसो दुहानं सौहार्दं परिचितमिवाथापि गहनम्। पदानां सौभ्रात्रादनिमिषनिषेव्यं श्रवणयोस्त्वमेव श्रीर्मह्यं बहुमुखय वाणीविलसितम् ।।८।। श्रियः श्रीः श्रीरङ्गेशय तव च हृद्यां भगवतीं श्रियं त्वत्तोऽप्युच्चैर्वयमिह फणामः शृणुतराम्। दृशौ ते भूयास्तां सुखतरलतारे श्रवणतः पुनर्हर्षोत्कर्षात् स्फुटतु भुजयोः कञ्चुकशतम् ।।९।। देवि श्रुतिं भगवतीं प्रथमे पुमांसस्त्वत्सद्गुणौघमणिकोशगृहं गृणन्ति। तद्द्वारपाटनपटूनि च सेतिहाससन्तर्कणस्मृतिपुराणपुरस्सराणि ।।१०।। आहुर्वेदानमानं कतिचन कतिचाराजकं विश्वमेतद्राजन्वत्केचिदीशं गुणिनमपि गुणैस्तं दरिद्राणमन्ये। भिक्षावन्ये

सुराजम्भवमिति च जडास्ते तलातल्यकार्षुर्ये ते श्रीरङ्गहर्म्याङ्गण-कनकलते न क्षणं लक्ष्यमासन् ।।११।। मनसि विलसताऽक्ष्णा भक्तिसिद्धाञ्जनेन श्रुतिशिरसिनिगूढं लक्ष्मि ते वीक्षमाणाः। निधिमिव महिमानं भुञ्जते येऽपि धन्याः ननु भगवति दैवीं सम्पदं तेऽभिजाताः ।।१२।। अस्येशाना जगत इतितेऽधीमहे यां समृद्धिं श्रीः श्रीसूक्तं बहुमुखयते तां च शाखानुशाखम्। ईष्टे कश्चिज्जगत इति यः पौरुषे सूक्त उक्तस्तं च त्वत्कं पतिमधिजगावुत्तर-श्चानुवाकः ।।१३।। उद्बाहुस्त्वामुपनिषदसावाह नैका नियन्त्रीं श्रीमद्रामायणमपि परं प्राणिति त्वच्चरित्रे। स्मर्त्तारोऽस्मज्जननि यतमे सेतिहासैः पुराणैर्नित्युर्वेदानपि च ततमे त्वन्महिम्नि प्रमाणम् ।।१४।। आकुग्रामनियामकादपि विभोरासर्व-निर्वाहकादैश्वर्यं यदिहोत्तरोत्तरगुणं श्रीरङ्गभर्तुः प्रिये। तुङ्गं मङ्गलमुज्ज्वलं गरिमवत् पुण्यं पुनः पावनं धन्यं यत्तददश्च वीक्षणभुवस्ते पञ्चषाः विप्रुषः ।।१५।। एको मुक्तातपत्रप्रचलमणिघणत्कारिमौलिर्मनुष्यो दृप्यद्दन्तावळस्थो न गणयति नतान् यत्क्षणं क्षोणिपालान्। यत्तस्मै तिष्ठतेऽन्यः कृपणमशरणो दर्शयन् दन्तपङ्क्तीं तत्ते श्रीरङ्गराजप्रणयिनि नयनोदञ्चितान्यञ्चिताभ्याम् ।।१६।। रतिर्मतिसरस्वती धृतिसमृद्धिसिद्धिश्रियः सुधासखि यतोमुखं चिचलिषेत्तव भ्रूलता। ततो मुखमथेन्दिरे बहुमुखीमहम्पूर्विकां विगाह्य च वशंवदाः परिवहन्ति कूलङ्कषाः ।।१७।। सह स्थिरपरित्रसव्रजविरिञ्चनाकिञ्चनैरनोकहबृहस्पति-प्रबलविक्लवप्रक्रियम्। इदं सदसदात्मना निखिलमेव निम्नोन्नतं कटाक्ष-तदुपेक्षयोस्तव हि लक्ष्मि तत्ताण्डवम् ।।१८।। काले शंसति योग्यतां चिदचितो-रन्योन्यमालिङ्गतोः भूताहङ्कृतिबुद्धिपञ्चकरणीस्वान्तप्रवृत्तीन्द्रियैः। अण्डानावरणैः सहस्रमकरोत्तान् भूर्भुवः सर्वतः श्रीरङ्गेश्वरदेवि ते विहृतये सङ्कल्पमानः प्रियः ।।१९।। शब्दादीन् विषयान् प्रदर्श्य विभवं विस्मार्य दास्यात्मकं वैष्णव्या

गुणमाययाऽऽत्मनिवहान् विप्लाव्य पूर्वः पुमान्। पुंसा पण्यवधूविडम्बिवपुषा धूर्तानिवायासयन् श्रीरङ्गेश्वरि कल्पते तव परीहासात्मने केलये ।।२०।। यद्दूरे मनसो यदेव तमसः पारे यदत्यद्भुतं यत्कालादपचेलिमं सुरपुरी यद्गच्छतो दुर्गतिः। सायुज्यस्य यदेव सूतिरथवा यद्दुर्ग्रहं मद्गिरां तद्विष्णोः परमं पदं तव कृते मातस्समाम्नासिषुः ।।२१।। हेलायामखिलं चराचरमिदं भोगे विभूतिः परा पुण्यास्ते परिचारकर्मणि सदा पश्यन्ति ये सूरयः। श्रीरङ्गेश्वरदेवि केवलकृपानिर्वाह्यवर्गे वयं शेषित्वे परमः पुमान् परिकरा ह्येते तव स्फारणे ।।२२।। आज्ञानुग्रहभीमकोमलपुरीपाला फलं भेजुषां याऽयोध्येत्यपराजितेति विदिता नाकं परेण स्थिता। भावैरद्भुतभोगभूमगहनैः सान्द्रा सुधास्यन्दिभिः श्रीरङ्गेश्वरगेहलक्ष्मि युवयोस्तां राजधानीं विदुः ।।२३।। तस्यां च त्वत्कृपावन्निरवधिजनताविश्रमार्हावकाशं सङ्कीर्णं दास्यतृष्णाकलितपरिकरैः पुम्भिरानन्दनिघ्नैः। स्नेहादास्थानरक्षाव्यसनिभिरभयं शार्ङ्गचक्रासिमुख्यैरानन्दै-कार्णवं श्रीर्भगवति युवयोराहुरास्थानरत्नम् ।।२४।। तत्र स्रक्स्पर्शगन्धं स्फुरदुपरिफणारत्नरोचिर्वितानं विस्तीर्यानन्तभोगं तदुपरि नयता विश्वमेकातपत्रम्। तैस्तैः कान्तेन शान्तोदितगुणविभवैरर्हता त्वामसङ्ख्यैरन्योन्याद्वैतनिष्ठाघन-रसगहनान् देवि बध्नासि भोगान् ।।२५।। भोग्या वामपि नान्तरीयकतया पुष्पाङ्गरागैः समं निर्वृत्तप्रणयातिवाहनविधौ नीताः परीवाहताम्। देवि त्वामनु नीलया सह महीदेव्यः सहस्रं तथा याभिस्वं स्तनबाहुदृष्टिभिरिव स्वाभिः प्रियं श्लाघसे ।।२६।। ते साध्याः सन्ति देवा जननि गुणवपुर्वेषवृत्तस्वरूपैः भोगैर्वा निर्विशेषाः सवयस इव ये नित्यनिर्दोषगन्धाः हे श्रीः श्रीरङ्गभर्तुस्तव च पदपरीचारवृत्त्यै सदाऽपि प्रेमप्रद्राणभावाविलहृदयहठात्कारकैङ्कर्यभोगाः ।।२७।। स्वरूपं स्वातन्त्र्यं भगवत इदं चन्द्रवदने त्वदाश्लेषोत्कर्षाद्भवति

खलु निष्कर्षसमये। त्वमासीर्मातः श्रीः कमितुरिदमित्थं त्वविभवस्तदन्तर्भावात्त्वां न पृथगभिदधत्ते श्रुतिरपि ।।२८।। तव स्पर्शादीशं स्पृशति कमले मङ्गलपदं तवेदं नोपाधेरुपनिपतितं श्रीरसि यतः। प्रसूनं पुष्यन्तीमपि परिमलर्धिं जिगदिषुर्न चैवं त्वा देवं स्वदत इति कश्चित्कवयते ।।२९।। अपाङ्गा भूयांसो यदुपरि परं ब्रह्म तदभूदमी यत्र द्वित्राः स च शतमखादिस्तदधरात्। अतः श्रीराम्नायस्तदुभयमुशंस्त्वां प्रणिजगौ प्रशस्तिः सा राज्ञो यदपि च पुरीकोश-कथनम् ।।३०।। स्वतः श्रीस्त्वं विष्णोः स्वमसि तत एवैश भगवांस्त्वदाय-त्तर्धित्वेऽप्यभवदपराधीनविभवः। स्वया दीप्त्या रत्नं भवदपि महार्घं न विगुणं न कुण्ठस्वातन्त्र्यं भवति न चान्याहितगुणम् ।।३१।। प्रशकनबलज्योतिर्ज्ञानैश्वरी-विजयप्रथाप्रणतवरणप्रेमक्षेमङ्करत्वपुरस्सरा अपि परिमलः कान्तिर्लावण्य-मर्चिरितीन्दिरे तव भगवतश्चैते साधारणाः गुणराशयः ।।३२।। अन्येऽपि यौवनमुखाः युवयोः समानाः श्रीरङ्गमङ्गलविजृम्भणवैजयन्ति तस्मिंस्तव त्वयि च तस्य परस्परेण संस्तीर्य दर्पण इव प्रचुरं स्वदन्ते ।।३३।। युवत्वादौ तुल्येऽप्यरवशताशत्रुशमनस्थिरत्वादीन् कृत्वा भगवति गुणान् पुंस्त्वसुलभान्। त्वयि स्त्रीत्वैकान्तान् प्रदिमपतिपारार्थ्यकरुणाक्षमादीन् वा भोक्तुं भवति युवयोरात्मनि भिदा ।।३४।। घनकनकद्युती युवदशामपि मुग्धदशां युवतरुणत्वयोरुचितमाभरणादि परम्। ध्रुवमसमानदेशविनिवेशि विभज्य हरौ त्वयि च कुशेशयोदरविहारिणि निर्विशसि ।।३५।। अङ्गं ते मृदुशीतमुग्ध-मधुरोदारैर्गुणैर्गुम्भतः क्षीराब्धेः किमृजीषतामुपगताः मन्ये महार्घास्ततः। इन्दुः कल्पलता सुधामधुमुखा इत्याविलां वर्णनां श्रीरङ्गेश्वरि शान्तकृत्रिमकथं दिव्यं वपुर्नार्हति ।।३६।। प्रणमदनुविधित्सावासनानम्रमग्रे प्रणयिपरिचि-चीषाकुञ्चितं पार्श्वकेन। कनकनिकषचञ्चच्चम्पकस्रक्समानप्रवरमिदमुदारं वर्ष्म

वाचामभूमिः ।।३७।। एकं न्यञ्च्य नतिक्षमं मम परं चाकुञ्च्य पादाम्बुजं मध्ये विष्टरपुण्डरीकमभयं विन्यस्य हस्ताम्बुजम्। त्वां पश्येम निषेदुषीं प्रतिकलं कारुण्यकूलङ्कषस्फारापाङ्गतरङ्गमम्ब मधुरं मुग्धं मुखं बिभ्रतीम् ।।३८।। सुरभितनिगमान्तं वन्दिषीयेन्दिरायास्तव कमलपलाशप्रक्रियं पादयुग्मम्। वहति यदुपमर्देवैर्जयन्ती हिमाम्भः प्लुतिरिव नवत्वं कान्तबाहान्तराले ।।३९।। त्वत्स्वीकारकलावलेपकलुषा राज्ञां दृशो दुर्वचाः नित्यं त्वन्मधुपानमत्तमधुपश्री-निर्भराभ्यां पतिम्। दृग्भ्यामेव हि पुण्डरीकनयनं वेदो विदामास ते साक्षाल्लक्ष्मि तवावलोकविभवः का क्वा कया वर्ण्यते ।।४०।। आनन्दात्मभिरीशमज्जन-मदक्षीबालसैरागलप्रेमार्द्रैरपि कूलमुद्वहकृपासम्प्लावितास्मादृशैः। पद्मे ते प्रतिबिन्दुबद्धकलिकब्रह्मादिविष्कम्भवैरेश्चर्योद्गमगद्गदैरशरणं मां पालयाऽऽलोकितैः ।।४१।। पादारुन्तुदमेवपङ्कजरजश्चेटीभृशालोकितै-रङ्गम्लानिरथाम्ब साहसविधौ लीलारविन्दग्रहो डोला ते वनमालया हरिभुजे हा कष्टशब्दास्पदं केन श्रीरतिकोमला तनुरियं वाचां विमर्दक्षमा ।।४२।। आ मर्यादमकण्टकं स्तनयुगं नाद्यापि नालोकितभ्रूभेदस्मितविभ्रमा जहति वा नैसर्गिकत्वाऽयशः। सूते शैशवयौवनव्यतिकरो गात्रेषु ते सौरभं भोगस्रोतसि कान्तदेशिककरग्राहेण गाहक्षमः ।।४३।। आमोदाद्भुतशालि यौवनदशाव्या-कोचमम्लानिमत् सौन्दर्यामृतसेकशीतलमिदं लावण्यसूत्रार्पितम्। श्रीरङ्गेश्वरि कोमलाङ्गसुमनः सन्दर्भणं देवि ते कान्तोरः प्रतियत्नमर्हति कविं धिङ् मामकाण्डाकुलम् ।।४४।। मर्मस्पृशो रससिरा व्यतिविध्य वृत्तैः कान्तोपभोग-ललितैर्लुलिताङ्गयष्टिः। पुष्पावलीव रसिकभ्रमरोपभुक्ता त्वं देवि नित्यमभिनन्दयसे मुकुन्दम् ।।४५।। कनकरशनामुक्ताताटङ्कहारललाटिकामणिसरतुलाकोटि-प्रायैर्जनार्दनजीविके प्रकृतिमधुरं गात्रं जागर्ति मुग्धविभूषणैर्वलयशकलैर्दुग्धं

पुष्पैश्च कल्पलता यथा ।।४६।। सामान्यभोग्यमपि कौस्तुभवैजयन्तीपञ्चायुधादि रमणः स्वयमेव बिभ्रत्। तद्भारखेदमिव ते परिहर्तुकामः श्रीरङ्गधाममणिमञ्जरि गाहते त्वाम् ।।४७।। यदि मनुजतिरश्चां लीलया तुल्यवृत्तेरनुजनुरनुरूपा देवि नावातरिष्यः। असरसमभविष्यन्नर्म नाथस्य मातर्दरदलदरविन्दोदन्त-कान्तायताक्षि ।।४८।। स्खलितकटकमाल्यैर्दोर्भिरब्धिं मुरारेर्भगवति दधिमाथं मथ्नतः श्रान्तिशान्त्यै। भ्रमदमृतरङ्गावर्ततः प्रादुरासीः स्मितनयनसुधाभिस्सिञ्चती चन्द्रिकेव ।।४९।। मातर्मैथिलि राक्षसीस्त्वयि तदैवार्द्रापराधास्त्वया रक्षन्त्या पवनात्मजाल्लघुतरा रामस्य गोष्ठी कृता काकं तं च विभीषणं शरणमित्युक्तिक्षमौ रक्षतः सा नः सान्द्रमहागसः सुखयतु क्षान्तिस्तवाकस्मिकी ।।५०।। मातर्लक्ष्मि यथैव मैथिलजनस्तेनाध्वना ते वयं त्वद्दास्यैकरसाभिमानसुभगैर्भावै-रिहामुत्र च। जामाता दयितस्तवेति भवतीसम्बन्धदृष्ट्या हरिं पश्येम प्रतियाम याम च परीचारान् प्रहृष्येम च ।।५१।। पितेव त्वत्प्रेयान् जननि परिपूर्णागसि जने हितस्रोतो वृत्त्या भवति च कदाचित्कलुषधीः। किमेतन्निर्दोषः क इह जगतीतित्वमुचितैरुपायैर्विस्मार्य स्वजनयसि माता तदसि नः ।।५२।। नेतुर्नित्यसहायिनी जननि नस्त्रातुं त्वमत्रागता लोके त्वन्महिमावबोधबधिरे प्राप्ता विमर्दं बहु। क्लिष्टं ग्रावसु मालतीमृदुपदं विश्लिष्य वासो वने जातो धिक्करुणां धिगस्तु युवयोः स्वातन्त्र्यमत्यङ्कुशम् ।।५३।। अधिशयितवानब्धिं नाथो ममन्थ बबन्ध तं हरधनुरसौ वल्लीभङ्गं बभञ्ज च मैथिलि। अपि दशमुखीं लूत्वा रक्षः कबन्धमनर्तयत् किमिव न पतिः कर्ता त्वच्चाटुचुञ्चुमनोरथः ।।५४।। दशशतपाणिपादवदनाक्षिमुखैरखिलैरपि निजवैश्वरूप्यविभवैरनुरूप-गुणैः। अवतरणैरतैश्च रसयन् कमिता कमले क्वचन हि विभ्रमभ्रमिमुखे विनिमज्जति ते ।।५५।। जननभवनप्रीत्या दुग्धार्णवं बहुमन्यसे जननि

दयितप्रेम्णा पुष्णासि तत्परमं पदम्। उदधिपरमव्योम्नोर्विस्मृत्य मादृशरक्षणक्षम-मिति धिया भूयः श्रीरङ्गधामनि मोदसे ।।५६।। औदार्यकारुणिकताश्रित-वत्सलत्वपूर्वेषु सर्वमतिशायितमत्र मातः। श्रीरङ्गधाम्नि यदुतान्यदुदाहरन्ति सीतावतारमुखमेतदमुष्य योग्या ।।५७।। ऐश्वर्यमक्षरगतिं परमं पदं वा कस्मै चिदञ्जलिभरं वहते वितीर्य अस्मै न किञ्चिदुचितं कृतमित्यथाम्ब त्वं लज्जसे कथय कोऽयमुदारभावः ।।५८।। ज्ञानक्रियाभजनसम्पदकिञ्चनोऽहं इच्छाधिकारशकनानुशयानभिज्ञः। आगांसि देवि युवयोरपि दुस्सहानि बध्नामि मूर्खचरितस्तव दुर्भरोऽस्मि ।।५९।। इत्युक्तिकैतवशतेन विडम्बयामि तानम्ब सत्यवचसः पुरुषान् पुराणान्। यद्वा न मे भुजबलं तव पादपद्मलाभे त्वमेव शरणं विधितः कृताऽसि ।।६०।। श्रीरङ्गे शरदः शतं सह सुहृद्वर्गेण निष्कण्टकं निर्दुःखं सुसुखञ्च दास्यरसिकां भुक्त्वा समृद्धिं पराम्। युष्मत्पादसरोरुहान्तररजः स्याम त्वमम्बा पिता सर्वं च त्वमसि त्वमेव भव नः स्वीकुर्वकस्मात्कृपाम् ।। स्वस्तिश्रीः।।

।। अथ श्रीविष्णु-सहस्र-नामावलिः ।।

शान्ता-कारं भुजग-शयनं पद्म-नाभं सुरेशं
विश्वा-धारं गगन-सदृशं मेघ-वर्णं शुभाङ्गम् ।
लक्ष्मी-कान्तं कमल-नयनं योगिभि-र्ध्यान-गम्यं
वन्दे विष्णुं भवभय-हरं सर्व-लोकैक-नाथम् ।।

विश्वस्मै नमः। विष्णवे नमः। वषट्-काराय नमः। भूत-भव्य-भवत्-प्रभवे नमः। भूतकृते नमः। भूतभृते नमः। भावाय नमः। भूतात्मने नमः। भूत-भावनाय नमः। पूतात्मने नमः। परमात्मने नमः। मुक्तानां परम-गतये नमः। अव्ययाय नमः। पुरुषाय नमः। साक्षिणे नमः। क्षेत्रज्ञाय नमः।

अक्षराय नमः। योगाय नमः। योग-विदां नेत्रे नमः। प्रधान-पुरुषेश्वराय नमः। नारसिंह-वपुषे नमः। श्रीमते नमः। केशवाय नमः। पुरुषोत्तमाय नमः। सर्वस्मै नमः। शर्वाय नमः। शिवाय नमः। स्थाणवे नमः। भूतादये नमः। निधये अव्ययाय नमः। सम्भवाय नमः। भावनाय नमः। भर्त्रे नमः। प्रभवाय नमः। प्रभवे नमः। ईश्वराय नमः। स्वयम्भुवे नमः। शम्भवे नमः। आदित्याय नमः। पुष्कराक्षाय नमः। महास्वनाय नमः। अनादि-निधनाय नमः। धात्रे नमः। विधात्रे नमः। धातु-रुत्तमाय नमः। अप्रमेयाय नमः। हृषीकेशाय नमः। पद्मनाभाय नमः। अमर-प्रभवे नमः। विश्वकर्मणे नमः। मनवे नमः। त्वष्ट्रे नमः। स्थविष्ठाय नमः। स्थविराय ध्रुवाय नमः। अग्रह्याय नमः। शाश्वताय नमः। कृष्णाय नमः। लोहिताक्षाय नमः। प्रतर्दनाय नमः। प्रभूताय नमः। त्रिककुब्-धाम्ने नमः। पवित्राय नमः। मङ्गलाय परस्मै नमः। ईशानाय नमः। प्राणदाय नमः। प्राणाय नमः। ज्येष्ठाय नमः। श्रेष्ठाय नमः। प्रजापतये नमः। हिरण्य-गर्भाय नमः। भूगर्भाय नमः। माधवाय नमः। मधु-सूदनाय नमः। ईश्वराय नमः। विक्रमिणे नमः। धन्विने नमः। मेधाविने नमः। विक्रमाय नमः। क्रमाय नमः। अनुत्तमाय नमः। दुराधर्षाय नमः। कृतज्ञाय नमः। कृतये नमः। आत्मवते नमः। सुरेशाय नमः। शरणाय नमः। शर्मणे नमः। विश्वरेतसे नमः। प्रजाभवाय नमः। अह्ने नमः। सम्वत्सराय नमः। व्यालाय नमः। प्रत्ययाय नमः। सर्व-दर्शनाय नमः। अजाय नमः। सर्वेश्वराय नमः। सिद्धाय नमः। सिद्धये नमः। सर्वादये नमः। अच्युताय नमः (१००) वृषाकपये नमः। अमेयात्मने नमः। सर्वयोग-विनिस्सृताय नमः। वसवे नमः। वसुमनसे नमः। सत्याय नमः। समात्मने नमः। सम्मिताय नमः। समाय नमः। अमोघाय नमः। पुण्डरीकाक्षाय

नमः। वृषकर्मणे नमः। वृषाकृतये नमः। रुद्राय नमः। बहुशिरसे नमः। बभ्रवे नमः। विश्वयोनये नमः। शुचि-श्रवसे नमः। अमृताय नमः। शाश्वत-स्थाणवे नमः। वरा-रोहाय नमः। महातपसे नमः। सर्वगाय नमः। सर्वविद्-भानवे नमः। विष्वक्सेनाय नमः। जनार्दनाय नमः। वेदाय नमः। वेदविदे नमः। अव्यङ्गाय नमः। वेदाङ्गाय नमः। वेदविदे नमः। कवये नमः। लोकाध्यक्षाय नमः। सुराध्यक्षाय नमः। धर्माध्यक्षाय नमः। कृताकृताय नमः। चतुरात्मने नमः। चतुर्व्यूहाय नमः। चतुर्दंष्ट्राय नमः। चतुर्भुजाय नमः। भ्राजिष्णवे नमः। भोजनाय नमः। भोक्त्रे नमः। सहिष्णवे नमः। जगदादि-जाय नमः। अनघाय नमः। विजयाय नमः। जेत्रे नमः। विश्व-योनये नमः। पुनर्वसवे नमः। उपेन्द्राय नमः। नामाय नमः। प्रांशवे नमः। अमोघाय नमः। शुचये नमः। उर्जिताय नमः। अतीन्द्राय नमः। सङ्ग्रहाय नमः। सर्गाय नमः। धृतात्मने नमः। नियमाय नमः। यमाय नमः। वेद्याय नमः। वैद्याय नमः। सदा-योगिने नमः। वीरघ्ने नमः। माधवाय नमः। मधवे नमः। अतीन्द्रियाय नमः। महा-मायाय नमः। महोत्साहाय नमः। महा-बलाय नमः। महाबुधाय नमः। महावीराय नमः। महाशक्तये नमः। महाद्युतये नमः। अनिर्देश्य-वपुषे नमः। श्रीमते नमः। अमेयात्मने नमः। महाद्रि-धृशे नमः। महेश्वासाय नमः। महीभर्त्रे नमः। श्रीनिवासाय नमः। सतां गतये नमः। अनिरुद्धाय नमः। सुरानन्दाय नमः। गोविन्दाय नमः। गोविदां पतये नमः। मरीचये नमः। दमनाय नमः। हंसाय नमः। सुपर्णाय नमः। भुजगोत्तमाय नमः। हिरण्य-नाभाय नमः। सुतपसे नमः। पद्मनाभाय नमः। प्रजा-पतये नमः। अमृत्यवे नमः। सर्वदृशे नमः। सिंहाय नमः (२००) सन्धात्रे नमः। सन्धि-मते नमः। स्थिराय नमः। अजाय नमः।

दुर्मर्षणाय नमः। शास्त्रे नमः। विश्रुतात्मने नमः। सुरारिघ्ने नमः। गुरुवे नमः। गुरु-तमाय नमः। धाम्ने नमः। सत्याय नमः। सत्य-पराक्रमाय नमः। निमिषाय नमः। अनिमिषाय नमः। स्रग्वीणे नमः। वाचस्पतय उदारधिये नमः। अग्रण्ये नमः। ग्रामण्ये नमः। श्रीमते नमः। न्यायाय नमः। नेत्रे नमः। समीरणाय नमः। सहस्र-मूर्ध्ने नमः। विश्वात्मने नमः। सहस्राक्षाय नमः। सहस्रपदे नमः। आवर्तनाय नमः। निवृत्तात्मने नमः। संवृत्ताय नमः। सम्प्रमर्दनाय नमः। अहःसंवर्तकाय नमः। वह्नये नमः। अनिलाय नमः। धरणी-धराय नमः। सुप्रसादाय नमः। प्रसन्नात्मने नमः। विश्वधृषे नमः। विश्व-भुजे नमः। विभवे नमः। सत्कर्त्रे नमः। सत्कृताय नमः। साधवे नमः। जाह्नवे नमः। नारायणाय नमः। नराय नमः। असङ्ख्येयाय नमः। अप्रमेयात्मने नमः। विशिष्टाय नमः। शिष्ट-कृते नमः। शुचये नमः। सिद्धार्थाय नमः। सिद्ध-सङ्कल्पाय नमः। सिद्धि-दाय नमः। सिद्धि-साधाय नमः। वृषाहिणे नमः। वृषभाय नमः। विष्णवे नमः। वृष-पर्वणे नमः। वृषोदराय नमः। वर्धनाय नमः। वर्धमानाय नमः। विविक्ताय नमः। श्रुति-सागराय नमः। सुभुजाय नमः। दुर्धराय नमः। वाग्मिने नमः। महेन्द्राय नमः। वसुदाय नमः। वसवे नमः। नैक-रूपाय नमः। बृहद्रूपाय नमः। शिपि-विष्टाय नमः। प्रकाशाय नमः। ओजस्तेजो-द्युति-धराय नमः। प्रकाशात्मने नमः। प्रतापनाय नमः। ऋद्धाय नमः। स्पष्टाक्षराय नमः। मन्त्राय नमः। चन्द्रांशवे नमः। भास्कर-द्युतये नमः। अमृतांशूद्-भवाय नमः। भानवे नमः। शश-बिन्दवे नमः। सुरेश्वराय नमः। औषधाय नमः। जगत्-सेतवे नमः। सत्य-धर्म-पराक्रमाय नमः। भूत-भव्य-भवन्नाथाय नमः। पवनाय नमः। पावनाय नमः। अनलाय नमः। कामघ्ने नमः। काम-कृते नमः।

कान्ताय नमः। कामाय नमः। काम-प्रदाय नमः। प्रभवे नमः। युगादि-कृते नमः (३००) युगावर्ताय नमः। नैक-मायाय नमः। महा-शनाय नमः। अदृश्याय नमः। व्यक्त-रूपाय नमः। सहस्र-जिते नमः। अनन्त-जिते नमः। इष्टाय नमः। विशिष्टाय नमः। शिष्टेष्टाय नमः। शिखण्डिने नमः। नहुषाय नमः। वृषाय नमः। क्रोधाग्ने नमः। क्रोध-कृत्-कर्त्रे नमः। विश्व-बाहवे नमः। महीधराय नमः। अच्युताय नमः। प्रथिताय नमः। प्राणाय नमः। प्राणदाय नमः। वासवानुजाय नमः। अपान्निधये नमः। अधिष्ठानाय नमः। अप्रमत्ताय नमः। प्रतिष्ठिताय नमः। स्कन्दाय नमः। स्कन्द-धराय नमः। धुर्याय नमः। वरदाय नमः। वायु-वाहनाय नमः। वासुदेवाय नमः। बृहद्-भानवे नमः। आदि-देवाय नमः। पुरन्दराय नमः। अशोकाय नमः। तारणाय नमः। ताराय नमः। शूराय नमः। शौरये नमः। जनेश्वराय नमः। अनुकूलाय नमः। शता-वर्ताय नमः। पद्मिने नमः। पद्मनिभेक्षणाय नमः। पद्म-नाभाय नमः। अरविन्दाय नमः। पद्म-गर्भाय नमः। शरीर-भृते नमः। महर्धये नमः। ऋद्धाय नमः। वृद्धात्मने नमः। महाक्षाय नमः। गरुड-ध्वजाय नमः। अतुलाय नमः। शरभाय नमः। भीमाय नमः। समयज्ञाय नमः। हविर्हरये नमः। सर्व-लक्षण-लक्षणाय नमः। लक्ष्मी-वते नमः। समिति-ञ्जयाय नमः। विक्षराय नमः। रोहिताय नमः। मार्गाय नमः। हेतवे नमः। दामोदराय नमः। सहाय नमः। महीधराय नमः। महाभागाय नमः। वेगवते नमः। अमिता-शनाय नमः। उद्भवाय नमः। क्षोभनाय नमः। देवाय नमः। श्रीगर्भाय नमः। परमेश्वराय नमः। करणाय नमः। कारणाय नमः। कर्त्रे नमः। विकर्त्रे नमः। गहनाय नमः। गुहाय नमः। व्यवसायाय नमः। व्यवस्थानाय नमः। संस्थानाय नमः। स्थानदाय नमः। ध्रुवाय नमः।

परार्धये नमः। परम-स्पष्टाय नमः। तुष्टाय नमः। पुष्टाय नमः। शुभेक्षणाय नमः। रामाय नमः। विरामाय नमः। विरजाय नमः। मार्गाय नमः। नेयाय नमः। नयाय नमः। अनयाय नमः (४००) वीराय नमः। शक्ति-मतां श्रेष्ठाय नमः। धर्माय नमः। धर्म-विदुत्तमाय नमः। वैकुण्ठाय नमः। पुरुषाय नमः। प्राणाय नमः। प्राणदाय नमः। प्रणवाय नमः। पृथवे नमः। हिरण्य-गर्भाय नमः। शत्रुघ्नाय नमः। व्याप्ताय नमः। वायवे नमः। अधोक्षजाय नमः। ऋतवे नमः। सुदर्शनाय नमः। कालाय नमः। परमेष्ठिने नमः। परिग्रहाय नमः। उग्राय नमः। सम्वत्सराय नमः। दक्षाय नमः। विश्रामाय नमः। विश्व-दक्षिणाय नमः। विस्ताराय नमः। स्थावर-स्थाणवे नमः। प्रमाणाय नमः। बीजाव्ययाय नमः। अर्थाय नमः। अनर्थाय नमः। महाकोशाय नमः। महाभोगाय नमः। महाधनाय नमः। अनिर्विण्णाय नमः। स्थविष्ठाय नमः। अभुवे नमः। धर्म-यूपाय नमः। महा-मखाय नमः। नक्षत्र-नेमये नमः। नक्षत्रिणे नमः। क्षमाय नमः। क्षामाय नमः। समीहनाय नमः। यज्ञाय नमः। ईज्याय नमः। महेज्याय नमः। क्रतवे नमः। सत्राय नमः। सतां गतये नमः। सर्व-दर्शिने नमः। विमुक्तात्मने नमः। सर्वज्ञाय नमः। ज्ञानोत्तमाय नमः। सुव्रताय नमः। सुमुखाय नमः। सूक्ष्माय नमः। सुघोषाय नमः। सुखदाय नमः। सुहृदे नमः। मनोहराय नमः। जित-क्रोधाय नमः। वीर-बाहवे नमः। विदारणाय नमः। स्वापनाय नमः। स्ववशाय नमः। व्यापिने नमः। नैकात्मने नमः। नैक-कर्म-कृते नमः। वत्सराय नमः। वत्सलाय नमः। वत्सिने नमः। रत्न-गर्भाय नमः। धनेश्वराय नमः। धर्मगुपे नमः। धर्मकृते नमः। धर्मिने नमः। सते नमः। असते नमः। क्षराय नमः। अक्षराय नमः। अविज्ञात्रे नमः। सहस्त्रांशवे नमः। विधात्रे नमः। कृत-

लक्षणाय नमः। गभस्ति-नेमये नमः। सत्त्व-स्थाय नमः। सिंहाय नमः। भूत-महेश्वराय नमः। आदि-देवाय नमः। महादेवाय नमः। देवेशाय नमः। देवभृद्-गुरवे नमः। उत्तराय नमः। गोपतये नमः। गोप्त्रे नमः। ज्ञान-गम्याय नमः। पुरातनाय नमः। शरीर-भूभृते नमः। भोक्त्रे नमः (५००) कपीन्द्राय नमः। भूरि-दक्षिणाय नमः। सोमपाय नमः। अमृतपाय नमः। सोमाय नमः। पुरुजिते नमः। पुरुसत्तमाय नमः। विनयाय नमः। जयाय नमः। सत्यसन्धाय नमः। दाशार्हाय नमः। सात्वतां पतये नमः। जीवाय नमः। विनयिता-साक्षिणे नमः। मुकुन्दाय नमः। अमित-विक्रमाय नमः। अम्भो-निधये नमः। अनन्तात्मने नमः। महोदधि-शयाय नमः। अनन्त-काय नमः। अजाय नमः। महार्हाय नमः। स्वाभाव्याय नमः। जिता-मित्राय नमः। प्रमोदाय नमः। आनन्दाय नमः। नन्दनाय नमः। नन्दाय नमः। सत्य-धर्मणे नमः। त्रिविक्रमाय नमः। महर्षि-कपिलाचार्याय नमः। कृतज्ञाय नमः। मेदिनीपतये नमः। त्रिपदाय नमः। त्रिदशाध्यक्षाय नमः। महाशृङ्गाय नमः। कृतान्त-कृते नमः। महा-वराहाय नमः। गोविन्दाय नमः। सुषेणाय नमः। कनकाङ्ग-दिने नमः। गुह्याय नमः। गभीराय नमः। गहनाय नमः। गुप्ताय नमः। चक्र-गदा-धराय नमः। वेधसे नमः। स्वाङ्गाय नमः। अजिताय नमः। कृष्णाय नमः। दृढाय नमः। सङ्कर्षणा-च्युताय नमः। वरुणाय नमः। वारुणाय नमः। वृक्षाय नमः। पुष्कराक्षाय नमः। महामनसे नमः। भगवते नमः। भगघ्ने नमः। आनन्दिने नमः। वन-मालिने नमः। हलायुधाय नमः। आदित्याय नमः। ज्योति-रादित्याय नमः। सहिष्णुवे नमः। गति-सत्तमाय नमः। सुधन्वने नमः। खण्ड-परशवे नमः। दारुणाय नमः। द्रविण-प्रदाय नमः। दिवस्पृशे नमः। सर्वदृग्-व्यासाय नमः। वाचस्पतये अयोनिजाय

नमः। त्रिसाम्ने नमः। साम-गाय नमः। साम्ने नमः। निर्वाणाय नमः। भेषजाय नमः। भिषजे नमः। सन्न्यास-कृते नमः। शमाय नमः। शान्ताय नमः। निष्ठायै नमः। शान्त्यै नमः। परायणाय नमः। शुभाङ्गाय नमः। शान्ति-दाय नमः। स्रष्ट्रे नमः। कुमुदाय नमः। कुव-लेशाय नमः। गो-हिताय नमः। गोपतये नमः। गोप्त्रे नमः। वृषभा-क्षाय नमः। वृषप्रियाय नमः। अनिवर्तिने नमः। निवृत्तात्मने नमः। सङ्क्षेप्त्रे नमः। क्षेमकृते नमः। शिवाय नमः (६००) श्रीवत्स-वक्षसे नमः। श्रीवासाय नमः। श्रीपतये नमः। श्रीमतां वराय नमः। श्रीदाय नमः। श्रीशाय नमः। श्री-निवासाय नमः। श्रीनिधये नमः। श्रीविभा-वनाय नमः। श्रीधराय नमः। श्रीकराय नमः। श्रेयसे नमः। श्रीमते नमः। लोक-त्रया-श्रयाय नमः। स्वक्षाय नमः। स्वाङ्गाय नमः। शतानन्दाय नमः। नन्द्ये नमः। ज्योति-र्गणेश्वराय नमः। विजितात्मने नमः। विधेयात्मने नमः। सत्कीर्तये नमः। छिन्न-संशयाय नमः। उदीर्णाय नमः। सर्वत-श्चक्षुषे नमः। अनीशाय नमः। शाश्वत-स्थिराय नमः। भूशयाय नमः। भूषणाय नमः। भूतये नमः। विशोकाय नमः। शोक-नाशनाय नमः। अर्चिष्मते नमः। अर्चिताय नमः। कुम्भाय नमः। विशुद्धात्मने नमः। विशोधनाय नमः। अनिरुद्धाय नमः। अप्रतिरथाय नमः। प्रद्युम्नाय नमः। अमित-विक्रमाय नमः। काल-नेमि-निघ्ने नमः। वीराय नमः। शौरये नमः। शूर-जनेश्वराय नमः। त्रिलोकात्मने नमः। त्रिलोकेशाय नमः। केशवाय नमः। केशिघ्ने नमः। हरये नमः। कामदेवाय नमः। काम-पालाय नमः। कामिने नमः। कान्ताय नमः। कृतागमाय नमः। अनिर्देश्य-वपुषे नमः। विष्णवे नमः। वीराय नमः। अनन्ताय नमः। धनञ्जयाय नमः। ब्रह्मण्याय नमः। ब्रह्मकृते नमः। ब्रह्मणे नमः। ब्राह्मणे नमः। ब्रह्म-

विवर्धनाय नमः। ब्रह्मविदे नमः। ब्राह्मणाय नमः। ब्रह्मिणे नमः। ब्रह्मज्ञाय नमः। ब्राह्मण-प्रियाय नमः। महा-क्रमाय नमः। महा-कर्मणे नमः। महा-तेजसे नमः। महोर-गाय नमः। महा-क्रतवे नमः। महा-यज्वने नमः। महा-यज्ञाय नमः। महा-हविषे नमः। स्तव्याय नमः। स्तव-प्रियाय नमः। स्तोत्राय नमः। स्तुतये नमः। स्तोत्रे नमः। रण-प्रियाय नमः। पूर्णाय नमः। पूरयित्रे नमः। पुण्याय नमः। पुण्य-कीर्तये नमः। अनामयाय नमः। मनो-जवाय नमः। तीर्थ-कराय नमः। वसु-रेतसे नमः। वसुप्रदाय नमः। वासुदेवाय नमः। वसवे नमः। वसु-मनसे नमः। हविषे नमः। हविषे नमः। सद्गतये नमः। सदृतये नमः (७००) सत्तायै नमः। सद्भूतये नमः। सत्परायणाय नमः। शूर-सेनाय नमः। यदु-श्रेष्ठाय नमः। सन्निवासाय नमः। सूयामुनाय नमः। भूतावासाय नमः। वासुदेवाय नमः। सर्वासु-निलयाय नमः। अनलाय नमः। दर्पघ्ने नमः। दर्पदाय नमः। दृप्ताय नमः। दुर्धराय नमः। अपराजिताय नमः। विश्व-मूर्तये नमः। महामूर्तये नमः। दीप्त-मूर्तये नमः। अमूर्तिमते नमः। अनेक-मूर्तये नमः। अव्यक्ताय नमः। शत-मूर्तये नमः। शताननाय नमः। एकस्मै नमः। नैकस्मै नमः। सवाय नमः। काय नमः। कस्मै नमः। यस्मै नमः। तस्मै नमः। पदानुत्तमाय नमः। लोक-बन्धवे नमः। लोक-नाथाय नमः। माधवाय नमः। भक्त-वत्सलाय नमः। सुवर्ण-वर्णाय नमः। हेमाङ्गाय नमः। वराङ्गाय नमः। चन्दनाङ्ग-दिने नमः। वीरघ्ने नमः। विषमाय नमः। शून्याय नमः। घृता-शीशाय नमः। अचलाय नमः। चलाय नमः। अमानिने नमः। मानदाय नमः। मान्याय नमः। लोक-स्वामिने नमः। त्रिलोक-धृषे नमः। सुमेधसे नमः। मेधजाय नमः। धन्याय नमः। सत्य-मेधसे नमः। धरा-धराय नमः। तेजो-वृषाय नमः। द्युति-धराय नमः। सर्व-

शस्त्र-भृतां वराय नमः। प्रग्रहाय नमः। निग्रहाय नमः। व्यग्राय नमः। नैक-शृङ्गाय नमः। गदाग्र-जाय नमः। चतु-र्मूर्तये नमः। चतु-र्बाहवे नमः। चतुर्व्यूहाय नमः। चतुर्गतये नमः। चतुरात्मने नमः। चतु-र्भावाय नमः। चतुर्वेद-विदे नमः। एकपदे नमः। समावर्ताय नमः। निवृत्तात्मने नमः। दुर्जाय नमः। दुरति-क्रमाय नमः। दुर्लभाय नमः। दुर्गमाय नमः। दुर्गाय नमः। दुरावासाय नमः। दुरारिघ्ने नमः। शुभाङ्गाय नमः। लोक-सारङ्गाय नमः। सुतन्तवे नमः। तन्तु-वर्धनाय नमः। इन्द्र-कर्मणे नमः। महा-कर्मणे नमः। कृतकर्मणे नमः। कृतागमाय नमः। उद्भवाय नमः (८००) सुन्दराय नमः। सुन्दाय नमः। रत्न-नाभाय नमः। सुलोचनाय नमः। अर्काय नमः। वाज-सनाय नमः। शृङ्गिने नमः। जयन्ताय नमः। सर्वविज्-जयिने नमः। उद्भवाय नमः। सुवर्ण-बिन्दवे नमः। अक्षोभ्याय नमः। अधोक्ष-जाय नमः। सर्व-वागीश्वराय नमः। महा-ह्रदाय नमः। महा-गर्ताय नमः। महा-भूताय नमः। महा-निधये नमः। कुमुदाय नमः। कुन्दराय नमः। कुन्दाय नमः। पर्जन्याय नमः। पावनाय नमः। अनिलाय नमः। अमृतांशाय नमः। अमृत-वपुषे नमः। सर्वज्ञाय नमः। सर्वतो-मुखाय नमः। सुलभाय नमः। सुव्रताय नमः। सिद्धाय नमः। शत्रुजिते नमः। शत्रु-तापनाय नमः। न्यग्रोधाय नमः। उदुम्बराय नमः। अश्वत्थाय नमः। चाणूरान्ध्र-निषूदनाय नमः। सहस्रा-र्चिषे नमः। सप्त-जिह्वाय नमः। सप्तै-धसे नमः। सप्त-वाहनाय नमः। अमूर्तये नमः। अनघाय नमः। अचिन्त्याय नमः। भयकृते नमः। भय-नाशनाय नमः। अणवे नमः। बृहते नमः। कृशाय नमः। स्थूलाय नमः। गुणभृते नमः। निर्गुणाय नमः। महते नमः। अधृताय नमः। स्वधृताय नमः। स्वास्याय नमः। प्राग्वंशाय नमः। वंश-वर्धनाय नमः। भार-भृते

नमः। कथिताय नमः। योगिने नमः। योगीशाय नमः। सर्व-कामदाय नमः। आश्रमाय नमः। श्रमणाय नमः। क्षामाय नमः। सुपर्णाय नमः। वायु-वाहनाय नमः। धनुर्धराय नमः। धनुर्वेदाय नमः। दण्डाय नमः। दमित्रे नमः। दमाय नमः। अपराजिताय नमः। सर्व-सहाय नमः। नियन्त्रे नमः। नियमाय नमः। यमाय नमः। सत्त्व-वते नमः। सात्त्विकाय नमः। सत्याय नमः। सत्य-धर्म-परायणाय नमः। अभिप्रायाय नमः। प्रियार्हाय नमः। अर्हाय नमः। प्रियकृते नमः। प्रीति-वर्धनाय नमः। विहायसगतये नमः। ज्योतिषे नमः। सुरुचये नमः। हुतभुजे नमः। विभवे नमः। रवये नमः। विरोचनाय नमः। सूर्याय नमः। सवित्रे नमः। रवि-लोचनाय नमः। अनन्ताय नमः। हुतभुजे नमः। भोक्त्रे नमः। सुखदाय नमः। नैकजाय नमः। अग्रजाय नमः। अनिर्विण्णाय नमः। सदा-मर्षिणे नमः। लोकाधिष्ठानाय नमः। अद्भूताय नमः। सनाते नमः। सनातन-तमाय नमः। कपिलाय नमः। कपये नमः। अव्ययाय नमः (९००) स्वस्ति-दाय नमः। स्वस्ति-कृते नमः। स्वस्तये नमः। स्वस्ति-भुजे नमः। स्वस्ति-दक्षिणाय नमः। अरौद्राय नमः। कुण्डलिने नमः। चक्रिणे नमः। विक्रमिणे नमः। उर्जित-शासनाय नमः। शब्दाति-गाय नमः। शब्द-सहाय नमः। शिशिराय नमः। शर्वरी-कराय नमः। अक्रूराय नमः। पेशलाय नमः। दक्षाय नमः। दक्षिणाय नमः। क्षमिणां वराय नमः। विद्वत्तमाय नमः। वीतभयाय नमः। पुण्य-श्रवण-कीर्तनाय नमः। उत्तारणाय नमः। दुष्कृतिघ्ने नमः। पुण्याय नमः। दुःस्वप्न-नाशाय नमः। वीरघ्ने नमः। रक्षणाय नमः। सदभ्यो नमः। जीवनाय नमः। पर्यवस्थिताय नमः। अनन्त-रूपाय नमः। अनन्त-श्रिये नमः। जित-मन्यवे नमः। भयापहाय नमः। चतुरस्राय नमः। गभीरात्मने नमः। विदिशाय

नमः। व्यादिशाय नमः। दिशाय नमः। अनादये नमः। भुवोभुवे नमः। लक्ष्मै नमः। सुधीराय नमः। रुचिराङ्गदाय नमः। जननाय नमः। जन-जन्मादये नमः। भीमाय नमः। भीम-पराक्रमाय नमः। आधार-निलयाय नमः। धात्रे नमः। पुष्प-हासाय नमः। प्रजागराय नमः। ऊर्ध्वगाय नमः। सत्पथा-चाराय नमः। प्राणदाय नमः। प्रणवाय नमः। पणाय नमः। प्रमाणाय नमः। प्राण-निलयाय नमः। प्राणभृते नमः। प्राण-जीवाय नमः। तत्त्वाय नमः। तत्त्वविदे नमः। एकात्मने नमः। जन्म-मृत्यु-जराति-गाय नमः। भुर्भुवः-स्वस्तरवे नमः। ताराय नमः। सवित्रे नमः। प्रपिता-महाय नमः। यज्ञाय नमः। यज्ञपतये नमः। यज्वने नमः। यज्ञाङ्गाय नमः। यज्ञवाहनाय नमः। यज्ञभृते नमः। यज्ञकृते नमः। यज्ञिने नमः। यज्ञभुजे नमः। यज्ञ-साधनाय नमः। यज्ञान्त-कृते नमः। यज्ञ-गुह्याय नमः। अन्नाय नमः। अन्नादाय नमः। आत्म-योनये नमः। स्वयञ्जाताय नमः। वैखानाय नमः। साम-गायनाय नमः। देवकी-नन्दनाय नमः। स्रष्ट्रे नमः। क्षितीशाय नमः। पाप-नाशनाय नमः। शङ्खभृते नमः। नन्दकिने नमः। चक्रिणे नमः। शार्ङ्ग-धन्वने नमः। गदाधराय नमः। रथाङ्ग-पाणये नमः। अक्षोभ्याय नमः। सर्वप्रहरणा-युधाय नमः (१०००)

।। स्वस्ति श्रीमन्नारायणार्पणम् अस्तु ।।

अपराध-सहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्त्वा क्षमस्व जगदीश्वर ।।